१२०१ ओ३म् वृषा यूथेव वꣳसगः कृष्टीरियर्त्योजसा। ईशानो अप्रतिष्कुतः॥

१२०२ ओ३म् व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्वलम् ॥

१२०३ ओ३म् व्य१न्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्वलम् ॥

१२०४ ओ३म् व्यऽ.न्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्वलम्॥

१२०५ ओ३म् वयं घा ते अपि स्मसि स्तोतार इन्द्र गिर्वणः। त्वं नो जिन्व सोमपाः॥

१२०६ ओ३म् वयमिन्द्र त्वायवोऽभि प्र नोनुमो वृषन्। विद्धी त्वा३ऽऽऽ स्य नो वसो॥

१२०७ ओ३म् वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते॥

१२०८ ओ३म् वयमु त्वा तदिदर्था इन्द्र त्वायन्तः सखायः। कण्वा उक्थेभिर्जरन्ते॥

१२०९ ओ३म् शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः । चकृमा सत्यराधसे ॥

१२१० ओ३म् शक्रो वाचमधृष्टायोरुवाचो अधृष्णुहि। मंहिष्ठ आ मदर्दिवि ॥

१२११ ओ३म् शक्रो वाचमधृष्णुहि धामधर्मन्वि राजति। विमदन्बर्हिरासरन् ॥

१२१२ ओ३म् शतब्रध्न इषुस्तव सहस्रपर्ण एक इत् । यमिन्द्र चकृषे युजम् ॥

१२१३ ओ३म् शचिगो शचिपूजनायं रणाय ते सुतः। आखण्डल प्र हूयसे ॥

१२१४ ओ३म् शचिगो शचिपूजनाय२रणाय ते सुतः। आखण्डल प्र हूयसे॥

१२१५ ओ३म् शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे। यदहं गोपतिः स्याम् ॥

१२१६ ओ३म् शिक्षा ण इन्द्र राय आ पुरु विद्वा२ऋचीषम। अवा नः पार्ये धने॥

१२१७ ओ३म् शिक्षेयमस्मै दित्सेयँ२ शचीपते मनीषिणे। यदहं गोपतिः स्याम्॥

१२१८ ओ३म् शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् । इन्द्र सोमं शतक्रतो ॥

१२१९ ओ३म् शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो ॥

१२२० ओ३म् शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो ॥

१२२१ ओ३म् श्रुतं वो वृत्रहन्तमं प्र शर्धं चर्षणीनाम्। आशिषे राधसे महे॥

१२२२ ओ३म् श२सेदुक्थ२ सुदानव उत द्युक्षं यथा नरः। चकृमा सत्यराधसे॥

१२२३ ओ३म् स घा नो योग आ भुवत्स राये स पुरंध्याम्। गमद्वाजेभिरा स नः ॥

१२२४ ओ३म् स घेदुतासि वृत्रहन्त्समान इन्द्र गोपतिः । यस्ता विश्वानि चिच्युषे ॥

१२२५ ओ३म् स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च । अच्छा च नः सुम्नं नेषि ॥

१२२६ ओ३म् स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च। अछा च नः सुम्नं नेषि ॥

१२२७ ओ३म् स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत्। उरुधारेव दोहते ॥

१२२८ ओ३म् स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ॥

१२२९ ओ३म् स नः शक्रश्चिदा शकद्दानवाँ अन्तराभरः । इन्द्रो विश्वाभिरूतिभिः ॥

१२३० ओ३म् स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः। इन्द्रो विश्वा अति द्विषः ॥

१२३१ ओ३म् स नो ददातु तां रयिमुरुं पिशङ्गसंदृशम्। इन्द्रः पतिस्तुविष्टमो जनेष्वा ॥

१२३२ ओ३म् स नो नियुद्भिरा पृण कामं वाजेभिरश्विभिः । गोमद्भिर्गोपते धृषत् ॥

१२३३ ओ३म् स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि । अस्मभ्यमप्रतिष्कुतः ॥

१२३४ ओ३म् स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः ॥

१२३५ ओ३म् स मन्दस्वा ह्यन्धसो राधसे तन्वा ऽ महे। न स्तोतारं निदे करः ॥

१२३६ ओ३म् स हि विश्वानि पार्थिवाँ एको वसूनि पत्यते । गिर्वणस्तमो अध्रिगुः ॥

१२३७ ओ३म् सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत्। विश्वायुर्धेह्यक्षितम् ॥

१२३८ ओ३म् सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम्। असदित्ते विभु प्रभु ॥

१२३९ ओ३म् सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक् । अयुज्रन्प्रातरद्रयः ॥

१२४० ओ३म् सत्तो होता न ऋत्वियस्तिस्तिरे बर्हिरानुषक्। अयुज्रन्प्रातरद्रयः ॥

१२४१ ओ३म् सत्रा ते अनु कृष्टयो विश्वा चक्रेव वावृतुः । सत्रा महाँ असि श्रुतः ॥

१२४२ ओ३म् सप्ती चिद्घा मदच्युता मिथुना वहतो रथम् । एवेद्धूर्वृष्ण उत्तरा ॥

१२४३ ओ३म् समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः । समुद्रायेव सिन्धवः ॥

१२४४ ओ३म् समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः ॥

१२४५ ओ३म् समित्तान्वृत्रहाखिदत्खे अराँ इव खेदया । प्रवृद्धो दस्युहाभवत् ॥

१२४६ ओ३म् समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥

१२४७ ओ३म् समोहे वा य आशत नरस्तोकस्य सनितौ। विप्रासो वा धियायवः ॥

१२४८ ओ३म् सहस्रा ते शता वयं गवामा च्यावयामसि । अस्मत्रा राध एतु ते ॥

१२४९ ओ३म् सुतपाव्ने सुता इमे शुचयो यन्ति वीतये। सोमासो दध्याशिरः ॥

१२५० ओ३म् सुतेसुते न्योऽ कसे बृहद्बृहत एदरिः। इन्द्राय शूषमर्चति ॥

१२५१ ओ३म् सुरूपकृत्नुमूतये सुदुघामिव गोदुहे । जुहूमसि द्यविद्यवि ॥

१२५२ ओ३म् सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥

१२५३ ओ३म् सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥

१२५४ ओ३म् सुनीथो घा स मर्त्यो यं मरुतो यमर्यमा। मित्रास्पान्त्यद्रुहः॥

१२५५ ओ३म् सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि॥

१२५६ ओ३म् सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि॥

१२५७ ओ३म् सोमः पूषा च चेततुर्विश्वासा२ सुक्षितीनाम्। देवत्रा रथ्योर्हिता॥

१२५८ ओ३म् सोमाना२ स्वरणं कृणुहि ब्रह्मणस्पते। कक्षीवन्तं य औशिजः॥

१२५९ ओ३म् स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥

१२६० ओ३म् स्तोत्रमिन्द्राय गायत पुरुनृम्णाय सत्वने । नकिर्यं वृण्वते युधि ॥

१२६१ ओ३म् स्तोत्र२ राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता॥

१२६२ ओ३म् स्वादुष्टे अस्तु संसुदे मधुमान्तन्वे३ तव। सोमः शमस्तु ते हृदे ॥

१ २ ३ २ ३ १ २ ३ २ ३ १ २र २ ३ १ २ ३ १
१२६३ ओ३म् स घा नो योग आ भुवत्स राये स पुरन्ध्या। गमद्वाजेभिरा स नः॥

१ २ ३ २ ३ १ २र ३ १ २ ३ २ ३ १ २
१२६४ ओ३म् स नो वृषन्नमुं चरुꣳ सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः॥

१ २ ३ २ ३ १ २ ३ ३३ ३ १ ३र ३ २ २ ३ २ ३ २र ३ १ २
१२६५ ओ३म् सदा व इन्द्रश्चर्कृषदा उपो नु स सपर्यन्। न देवो वृतः शूर इन्द्रः॥

१ २ ३ २ ३ १ २ ३ १ २र ३ १ २ ३ २ ३ १ २
१२६६ ओ३म् सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्॥

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१२६७ ओ३म् समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः॥

१ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१२६८ ओ३म् समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः। समुद्रायेव सिन्धवः॥

१ २ ३ १ २ ३ २ ३ १ २र ३ २ २ ३ १ २र
१२६९ ओ३म् सरूप वृषन्ना गहीमौ भद्रौ धुर्यावभि। ताविमा उप सर्पतः॥

२ ३ १ २ ३ १ २र ३ २ ३ १ २ ३ १ २
१२७० ओ३म् स न इन्द्रः शिवः सखाश्वावद्गोमद्यवमत्। उरुधारेव दोहते॥

27. इन्द्रउषाश्च 1

१२७१ ओ३म् अपोषा अनसः सरत्सम्पिष्टादह बिभ्युषी । नि यत्सीं शिश्नथद्वृषा ॥

28. इन्द्र ऋभवश्च 1

१२७२ ओ३म् इन्द्रं इषे ददातु न ऋभुक्षणमृभुं रयिम् । वाजी ददातु वाजिनम् ॥

29. इन्द्रवायू 12

१२७३ ओ३म् आ वां सहस्रं हरय इन्द्रवायू अभि प्रयः । वहन्तु सोमपीतये ॥

१२७४ ओ३म् इन्द्रवायू अयं सुतस्तं देवेभिः सजोषसा । पिबतं दाशुषो गृहे ॥

१२७५ ओ३म् इन्द्रवायू इमे सुता उप प्रयोभिरा गतम् । इन्दवो वामुशन्ति हि ॥

१२७६ ओ३म् इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम्। आदित्यान् मारुतं गणम् ॥

१२७७ ओ३म् इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये । सहस्राक्षा धियस्पती ॥

१२७८ ओ३म् इन्द्रवायूऽइमे सुताऽउप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥

१२७९ ओ३म् इह प्रयाणमस्तु वामिन्द्रवायू विमोचनम् । इह वां सोमपीतये ॥

१२८० ओ३म् गावऽउपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥

१२८१ ओ३म् रथेन पृथुपाजसा दाश्वांसमुप गच्छतम् । इन्द्रवायू इहा गतम् ॥

१२८२ ओ३म् वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू । तावा यातमुप द्रवत् ॥

१२८३ ओ३म् शतेना नो अभिष्टिभिर्नियुत्वाँ इन्द्रसारथिः । वायो सुतस्य तृम्पतम् ॥

१२८४ ओ३म् शुक्रस्याद्य गवाशिर इन्द्रवायू नियुत्वतः । आ यातं पिबतं नरा ॥

30. इन्द्राग्नी 46

१२८५ ओ३म् अग्न इन्द्रश्च दाशुषे हतो वृत्राण्यप्रति। उभा हि वृत्रहन्तमा ॥

१२८६ ओ३म् आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा ॥

१२८७ ओ३म् इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः । अया पातमिमं सुतम् ॥

१२८८ ओ३म् इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम् । साकमेकेन कर्मणा ॥

१२८९ ओ३म् इमां गायत्रवर्तनिं जुषेथां सुष्टुतिं मम । इन्द्राग्नी आ गतं नरा ॥

१२९० ओ३म् इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि । ता सोमं सोमपातमा ॥

१२९१ ओ३म् इन्द्राग्नी जरितुः सचा यज्ञो जिगाति चेतनः। अया पातमिम२ सुतम्॥

१२९२ ओ३म् इन्द्राग्नी तविषाणि वां । सधस्थानि प्रयांसि च। युवोरप्तूर्यं हितम् ॥

१२९३ ओ३म् इन्द्राग्नी तविषाणि वा२ं सधस्थानि प्रया२ं सि च। युवोरप्तूर्य२ं हितम्॥

१२९४ ओ३म् इन्द्राग्नी नवतिं पुरो । दासपत्नीरधूनुतम्। साकमेकेन कर्मणा ॥

१२९५ ओ३म् इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतम्। साकमेकेन कर्मणा॥

१२९६ ओ३म् इन्द्राग्नी युवामिमेऽभि स्तोमा अनूषत। पिबत२ं शम्भुवा सुतम्॥

१२९७ ओ३म् इन्द्राग्नी रोचना दिवः परि वाजेषु भूषथः। तद्वां चेति प्र वीर्यम्॥

१२९८ ओ३म् इन्द्राग्नी अपसस्परि । उप प्र यन्ति धीतयः। ऋतस्य पथ्या अनु ॥

१२९९ ओ३म् इन्द्राग्नी अपसस्पर्युप प्र यन्ति धीतयः। ऋतस्य पथ्या अनु॥

१३०० ओ३म् इन्द्राग्नी आ गत२ं सुतं गीर्भिर्नभो वरेण्यम्। अस्य पातं धियेषिता॥

१३०१ ओ३म् इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे। धिया धेना अवस्यवः॥

१३०२ ओ३म् इन्द्रमग्निं कविच्छदा यज्ञस्य जूत्या वृणे। ता सोमस्येह तृम्पताम्॥

१३०३ ओ३म् इदं वां मदिरं मध्वधुक्षन्नद्रिभिर्नरः। इन्द्राग्नी तस्य बोधतम्॥

१३०४ ओ३म् इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः। अभ्राद्वृष्टिरिवाजनि॥

१३०५ ओ३म् उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा। आङ्गूषैराविवासतः ॥

१३०६ ओ३म् उग्रा सन्ता हवामह उपेदं सवनं सुतम् । इन्द्राग्नी एह गच्छताम् ॥

१३०७ ओ३म् उग्रा विघनिना मृध इन्द्राग्नी हवामहे। ता नो मृडात ईदृशे॥

१३०८ ओ३म् एवा वांमह्व ऊतये यथाहुवन्त मेधिराः । इन्द्राग्नी सोमपीतये ॥

१३०९ ओ३म् जुषेथां यज्ञमिष्टये सुतं सोमं सधस्तुती । इन्द्राग्नी आ गतं नरा ॥

१३१० ओ३म् तमीळिष्व यो अर्चिषा वना विश्वा परिष्वजत् । कृष्णा कृणोति जिह्वया ॥

१३११ ओ३म् ता नो वाजवतीरिष आशून्पिपृतमर्वतः । इन्द्रमग्निं च वोळ्हवे ॥

१३१२ ओ३म् ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे । सोमपा सोमपीतये ॥

१ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
१३१३ ओ३म् ता वां गीर्भिर्विपन्युवः प्रयस्वन्तो हवामहे। मेधसाता सनिष्यवः॥

१ २र ३ १ २ ३ १ २र ३ १ २ ३ २ ३ १ २
१३१४ ओ३म् ता हि शश्वन्त ईडत इत्था विप्रास ऊतये। सबाधो वाजसातये॥

१ २ ३ १ २ ३ २ ३ १ २र ३ २ ३ २ ३ १ २र
१३१५ ओ३म् ता हुवे ययोरिदं पप्ने विश्वं पुरा कृतम्। इन्द्राग्नी न मर्धतः॥

२ ३ १ २ ३ २ ३ १ २र ३ २ १ २ ३ १ २
१३१६ ओ३म् ताभिरा गच्छतं नरोपेदꣳ सवनꣳ सुतम्। इन्द्राग्नी सोमपीतये॥

१३१७ ओ३म् तेन सत्येन जागृतमधि प्रचेतुने पदे । इन्द्राग्नी शर्म यच्छतम् ॥

१३१८ ओ३म् तोशा वृत्रहणा हुवे सजित्वानापराजिता । इन्द्राग्नी वाजसातमा ॥

१३१९ ओ३म् तोशासा रथयावाना वृत्रहणापराजिता । इन्द्राग्नी तस्य बोधतम् ॥

३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २
१३२० ओ३म् तोशा वृत्रहणा हुवे सजित्वानापराजिता। इन्द्राग्नी वाजसातमा॥

३ १ २ ३ १ २ ३ १ २र १ २ ३ १ २
१३२१ ओ३म् तोशासा रथयावाना वृत्रहणापराजिता। इन्द्राग्नी तस्य बोधतम्॥

१ २ ३ १ २
१३२२ ओ३म् प्र वामर्चन्त्युक्थिनः । नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे ॥

१ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २
१३२३ ओ३म् प्र वामर्चन्त्युक्थिनो नीथाविदो जरितारः। इन्द्राग्नी इष आ वृणे॥

१ २ ३ १ २ ३ १ २ ३ १ २र १ २ ३ २
१३२४ ओ३म् मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये। मा नो रीरधतं निदे॥

१३२५ ओ३म् यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु । इन्द्राग्नी तस्य बोधतम् ॥

१३२६ ओ३म् या वां सन्ति पुरुस्पृहो नियुतो दाशुषे नरा । इन्द्राग्नी ताभिरा गतम् ॥

१३२७ ओ३म् या वाऽ सन्ति पुरुस्पृहो नियुतो दाशुषे नरा। इन्द्राग्नी ताभिरा गतम्॥

१३२८ ओ३म् यज्ञस्य हि स्थ ऋत्विजा सस्नी वाजेषु कर्मसु। इन्द्राग्नी तस्य बोधतम्॥

१३२९ ओ३म् श्रृणुतं जरितुउहवमिन्द्राग्नी वनतं गिरः। ईशाना पिप्यतं धियः॥

१३३० ओ३म् हथो वृत्राण्यार्या हथो दासानि सत्पती। हथो विश्वा अप द्विषः ॥

31. इन्द्रापूषणौ 2

१३३१ ओ३म् तां पूष्णः सुमतिं वयं वृक्षस्य प्र वयामिव । इन्द्रस्य चा रभामहे ॥

१३३२ ओ३म् यदिन्द्रो अनयद्रितो महीरपो वृषन्तमः । तत्र पूषाभवत्सचा ॥

32. इन्द्राबृहस्पती 9

१३३३ ओ३म् अनुकामं तर्पयेथामिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ॥

१३३४ ओ३म् अयं वां परि षिच्यते सोम इन्द्राबृहस्पती । चारुर्मदाय पीतये ॥

१३३५ ओ३म् अस्मे इन्द्राबृहस्पती रयिं धत्तं शतग्विनम् । अश्वावन्तं सहस्रिणम् ॥

१३३६ ओ३म् आ न इन्द्राबृहस्पती गृहमिन्द्रश्च गच्छतम् । सोमपा सोमपीतये ॥

१३३७ ओ३म् इन्द्राबृहस्पती वयं सुते गीर्भिर्हवामहे । अस्य सोमस्य पीतये ॥

१३३८ ओ३म् इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ॥

१३३९ ओ३म् इन्द्रावरुणयोरहं सम्राजोरव आ वृणे । ता नो मृळात ईदृशे ॥

१३४० ओ३म् प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे । यामृधाथे सधस्तुतिम् ॥

१३४१ ओ३म् सोमंमिन्द्राबृहस्पती पिबंतं दाशुषो गृहे । मादयेथां तदोकसा ॥

33. इन्द्राश्वौ 1

१३४२ ओ३म् कनीनकेवं विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते ॥

34. इन्द्रोमरुत्वान् 3

१३४३ ओ३म् इन्द्रंज्येष्ठा मरुद्गणा देवांसः पूषंरातयः । विश्वे ममं श्रुता हवंम् ॥

१३४४ ओ३म् मरुत्वंन्तं हवामह इन्द्रमा सोमंपीतये । सजूर्गणेनं तृम्पतु ॥

१३४५ ओ३म् हत वृत्रं सुंदानव इन्द्रेंण सहंसा युजा । मा नो दुःशंसं ईशत ॥

35. इळः 2

१३४६ ओ३म् अग्ने सुखतंमे रथे देवाँ ईळित आ वंह । असि होता मनुंर्हितः ॥

१३४७ ओ३म् अग्ने सुखतमे रथे दवा२ ईडित आ वह। असि होता मनुर्हितः॥

36. ईज्यास्तवो यजमानप्रशंसा च 2

१३४८ ओ३म् तस्यं द्युमाँ असद्रथो देवजूंतः स शूंशुवत् । विश्वां वन्वन्नंमित्रियां ॥

१३४९ ओ३म् यो यजांति यजांत इत्सुनवंच्च पचांति च । ब्रह्मेदिन्द्रंस्य चाकनत् ॥

37. उलूखलः 3

१३५० ओ३म् आयजी वांजसातंमा ता ह्यु१च्चा विजर्भृतः । हरी इवान्धांसि बप्संता ॥

१३५१ ओ३म् उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृंज । नि धेहि गोरधि त्वचि ॥

१३५२ ओ३म् ता नो॑ अ॒द्य व॑नस्पती ऋ॒ष्वावृ॒ष्वेभि॑: सो॒तृभि॑: । इन्द्रा॑य॒ मधु॑मत्सुतम् ॥

38. उषाः 5

१३५३ ओ३म् अश्वेव चित्रारुषी माता गवामृतावरी। सखा भूदश्विनोरुषाः॥

१३५४ ओ३म् आ द्यां त॑नोषि र॒श्मिभि॒रान्तरि॑क्षमु॒रु प्रि॒यम् । उष॑: शु॒क्रेण॑ शो॒चिषा॑ ॥

१३५५ ओ३म् उत सखास्यश्विनोरुत माता गवामसि। उतोषो वस्व ईशिषे॥

१३५६ ओ३म् प्रति॑ भ॒द्रा अ॑दृक्षत॒ गवां॒ सर्गा॒ न र॒श्मय॑: । ओषा अ॑प्रा उ॒रु ज्रय॑: ॥

१३५७ ओ३म् प्रति ष्या सूनरी जनी व्युच्छन्ती परि स्वसुः। दिवो अदर्शि दुहिता॥

39. ऋक्षाश्वमेधयोर्दानस्तुतिः 5

१३५८ ओ३म् ऋ॒ज्राविन्द्रो॒त आ द॑दे॒ हरी॒ ऋक्ष॑स्य सू॒नवि॑ । आ॒श्व॒मे॒धस्य॒ रोहि॑ता ॥

40. ऋभवः 4

१३५९ ओ३म् अ॒यं दे॒वाय॒ जन्म॑ने॒ स्तोमो॒ विप्रे॑भिरा॒सया । अका॑रि रत्न॒धात॑मः ॥

१३६० ओ३म् उ॒त त्यं च॑म॒सं नवं॒ त्वष्टु॑र्दे॒वस्य॒ निष्कृ॑तम् । अक॑र्त च॒तुर॒: पुन॑: ॥

१३६१ ओ३म् ते नो॒ रत्ना॑नि धत्तन॒ त्रिरा साप्ता॑नि सु॒न्व॒ते । एक॑मेकं सुश॒स्तिभि॑: ॥

१३६२ ओ३म् य इन्द्रा॑य वचो॒युजा॑ तत॒क्षुर्मन॑सा॒ हरी॑ । शमी॑भिर्य॒ज्ञमा॑शत ॥

41. ओषधयः 2

१३६३ ओ३म् क॒र॒म्भ ओ॑षधे भव॒ पीवो॑ वृ॒क्क उ॑दार॒थिः । वाता॑पे॒ पीव॒ इद्भ॑व ॥

१३६४ ओ३म् यत्ते सोम गवाशिरो यवाशिरो भजामहे । वातापे पीव इद्भव ॥

42. कुष्ठस्तक्मनाशनः 1

१३६५ ओ३म् इमं मे कुष्ठ पूरुषं तमा वह तं निष्कुरु। तमु मे अगदं कृधि ॥

43. कृषीवलाः कवयो वा देवताः 1

१३६६ ओ३म् सीरा युञ्जन्ति कवयो युगा वितन्वते पृथक्। धीरा देवेषु सुम्नया ॥

44. क्षत्रपतिर्देवता 1

१३६७ ओ३म् योगेयोगे तवस्तरं वाजेवाजे हवामहे। सखाय इन्द्रमूतये ॥

45. गौः 3

१३६८ ओ३म् अन्तश्चरति रोचना अस्य प्राणादपानतः। व्यऽख्यन्महिषः स्वःऽ ॥

१३६९ ओ३म् आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः ॥

१३७० ओ३म् त्रिंशद्धामा वि राजति वाक्पतङ्गो अशिश्रियत्। प्रति वस्तोरहर्द्युभिः ॥

46. गौः, सूर्यः 6

१३७१ ओ३म् अन्तश्चरति रोचना अस्य प्राणादपानतः। व्यख्यन्महिषः स्वऽः ॥

१३७२ ओ३म् अभि त्वा वर्चसा गिरः सिञ्चन्तीराचरण्यवः। अभि वत्सं न धेनवः ॥

१३७३ ओ३म् आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वऽः ॥

१३७४ ओ३म् ता अर्षन्ति शुभ्रियः पृञ्चतीर्वर्चसा प्रियः। जातं जात्रीर्यथा हृदा ॥

१३७५ ओ३म् त्रिंशद्धामा वि राजति वाक्पतङ्गो अशिश्रियत्। प्रति वस्तोरहर्द्युभिः ॥

१३७६ ओ३म् वज्रापवसाध्यः कीर्तिर्म्रियमाणमावहन्। मह्यमायुर्घृतं पयः ॥

47. ग्रावाणः 3

१३७७ ओ३म् ग्रावाणः सविता नु वो देवः सुवतु धर्मणा । यजमानाय सुन्वते ॥

१३७८ ओ३म् ग्रावाणो अप दुच्छुनामप सेधत दुर्मतिम् । उस्राः कर्तन भेषजम् ॥

१३७९ ओ३म् प्र वो ग्रावाणः सविता देवः सुवतु धर्मणा । धूर्षु युज्यध्वं सुनुत ॥

48. तनूनपातः 1

१३८० ओ३म् मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे। अद्या कृणुह्यूतये॥

49. तनूनपात् 1

१३८१ ओ३म् मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ॥

50. तरन्तो वैददश्विः 1

१३८२ ओ३म् यो मे धेनूनां शतं वैददश्विर्यथा ददत् । तरन्त इव मंहना ॥

51. त्वष्टा 1

१३८३ ओ३म् अभि यज्ञं गृणीहि नो ग्रावो नेष्टः पिब ऋतुना । त्वं हि रत्नधा असि ॥

१३८४ ओ३म् इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥

52. दम्पती 2

१३८५ ओ३म् न देवानामपि ह्नुतः सुमतिं न जुगुक्षतः । श्रवो बृहद्विवासतः ॥

१३८६ ओ३म् या दम्पती समनसा सुनुत आ च धावतः । देवासो नित्ययाशिरा ॥

53. दम्पत्योराशिषः 1

१३८७ ओ३म् अरमतिरनर्वणो विश्वो देवस्य मनसा । आदित्यानामनेह इत् ॥

54. देवा 2

१३८८ ओ३म् अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्या अधि सानवि॥

१३८९ ओ३म् आरे३ ऽसावस्मदस्तु हेतिर्देवासो असत्। आरे अश्मा यमस्यथ ॥

55. देवीर्द्वारः 1

१३९० ओ३म् वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः । अद्या नूनं च यष्टवे ॥

56. देव्यः 1

१३९१ ओ३म् अभि नो देवीरवसा महः शर्मणा नृपत्नीः । अच्छिन्नपत्राः सचन्ताम् ॥

57. द्यावापृथिवी 3

१३९२ ओ३म् पुनाने तन्वा मिथः स्वेन दक्षेण राजथः। ऊह्याथे सनादृतम्॥

१३९३ ओ३म् प्र वां महि द्यवी अभ्युपस्तुतिं भरामहे। शुची उप प्रशस्तये॥

१३९४ ओ३म् मही मित्रस्य साधथस्तरन्ती पिप्रती ऋतम्। परि यज्ञं नि षेदथुः॥

58. द्यावापृथिव्यौ 4

१३९५ ओ३म् त॒यो॒रिद्घृ॒तव॒त्पयो॒ विप्रा॑ रिहन्ति धी॒तिभि॑ः । ग॒न्ध॒र्वस्य॑ ध्रु॒वे प॒दे ॥

१३९६ ओ३म् म॒ही द्यौः पृ॑थि॒वी च॑ न इ॒मं य॒ज्ञं मि॑मिक्षताम् । पि॒पृ॒तां नो॒ भरी॑मभिः ॥

१३९७ ओ३म् म॒ही द्यौः पृ॑थि॒वी च॑ नऽ इ॒मं य॒ज्ञं मि॑मिक्षताम्। पि॒पृ॒तां नो॒ भरी॑मभिः ॥

१३९८ ओ३म् म॒ही मि॒त्रस्य॑ साधथ॒स्तर॑न्ती॒ पिप्र॑ती ऋ॒तम् । परि॑ य॒ज्ञं नि षे॑दथुः ॥

59. द्यावापृथिव्यौ हविर्धाने वा 3

१३९९ ओ३म् आ वा॑मु॒पस्थ॑मद्रुहा दे॒वाः सी॑दन्तु य॒ज्ञिया॑ः । इ॒हाद्य सोम॑पीतये ॥

१४०० ओ३म् द्यावा॑ नः पृथि॒वी इ॒मं सि॒ध्रम॒द्य दि॑वि॒स्पृश॑म् । य॒ज्ञं दे॒वेषु॑ यच्छताम् ॥

१४०१ ओ३म् प्रेता᳚ य॒ज्ञस्य॑ श॒म्भुवा॑ यु॒वामिदा वृ॑णीमहे । अ॒ग्निं च॑ हव्य॒वाह॑नम् ॥

60. द्रविणोदाः 4

१४०२ ओ३म् द्र॒वि॒णो॒दा द॑दातु नो॒ वसू॑नि॒ यानि॑ शृण्वि॒रे । दे॒वेषु॒ ता व॑नामहे ॥

१४०३ ओ३म् द्र॒वि॒णो॒दा द्रवि॑णसो॒ ग्राव॑हस्तासो अध्व॒रे । य॒ज्ञेषु॑ दे॒वमी॑ळते ॥

१४०४ ओ३म् द्र॒वि॒णो॒दाः पि॑पीषति जु॒होत॒ प्र च॑ तिष्ठत । ने॒ष्ट्रादृ॒तुभि॑रिष्यत ॥

१४०५ ओ३म् यत्त्वा॑ तु॒रीय॑मृ॒तुभि॒र्द्रवि॑णोदो॒ यजा॑महे । अध॑ स्मा नो द॒दिर्भ॑व ॥

61. नराशंसः 2

१४०६ ओ३म् नरा॒शंस॑मि॒ह प्रि॒यम॒स्मिन्य॒ज्ञ उप॑ ह्वये । मधु॑जिह्वं हवि॒ष्कृत॑म् ॥

१४०७ ओ३म् नराशꣳ समिह प्रियमस्मिन्यज्ञ उप ह्वये। मधुजिह्वꣳ हविष्कृतम्॥

62. परमेश्वरो देवता 1

१४०८ ओ३म् युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः। रोचन्ते रोचना दिवि ॥

63. पर्जन्यः 1

१४०९ ओ३म् पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे । स नो यवसमिच्छतु ॥

64. पवमानः 1

१४१० ओ३म् पवमानः पुनातु मा क्रत्वे दक्षाय जीवसे। अथो अरिष्टतातये ॥

65. पवमानः सोमः 646

१४११ ओ३म् अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् । इष्णन्त्सूर्यं न चोदयः ॥

१४१२ ओ३म् अत्यूं पवित्रमक्रमीद्वाजी धुरं न यामनि । इन्दुर्देवेषु पत्यते ॥

१४१३ ओ३म् अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥

१४१४ ओ३म् अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे । अभिष्टिकृद्विचर्षणिः ॥

१४१५ ओ३म् अधुक्षत प्रियं मधु धारा सुतस्य वेधसः । अपो वसिष्ट सुक्रतुः ॥

१४१६ ओ३म् अध्वर्यो अद्रिभिः सुतं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥

१४१७ ओ३म् अनप्तमप्सु दुष्टरं सोमं पवित्र आ सृज । पुनीहीन्द्राय पातवे ॥

१४१८ ओ३म् अनु द्रप्सास इन्दव आपो न प्रवतासरन् । पुनाना इन्द्रमाशत ॥

१४१९ ओ३म् अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम् ॥

१४२० ओ३म् अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः । नुदस्वादेवयुं जनम् ॥

१४२१ ओ३म् अभि क्षिपः समग्मत मर्जयन्तीरिषस्पतिम् । पृष्ठा गृभ्णत वाजिनः ॥

१४२२ ओ३म् अभि गावो अधन्विषुरापो न प्रवता यतीः । पुनाना इन्द्रमाशत ॥

१४२३ ओ३म् अभि गावो अनूषत योषा जारमिव प्रियम् । अगन्नाजिं यथा हितम् ॥

१४२४ ओ३म् अभि त्यं पूर्व्यं मदं सुवानो अर्ष पवित्र आ । अभि वाजमुत श्रवः ॥

१४२५ ओ३म् अभि त्वा योषणो दश जारं न कन्यानूषत । मृज्यसे सोम सातये ॥

१४२६ ओ३म् अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया । वाजं गोमन्तमक्षरन् ॥

१४२७ ओ३म् अभि प्रिया दिवस्पदमध्वर्युभिर्गुहा हितम् । सूरः पश्यति चक्षसा ॥

१४२८ ओ३म् अभि प्रिया दिवस्पदा सोमो हिन्वानो अर्षति । विप्रस्य धारया कविः ॥

१४२९ ओ३म् अभि ब्रह्मीरनूषत यह्वीरृतस्य मातरः । मर्मृज्यन्ते दिवः शिशुम् ॥

१४३० ओ३म् अभि विप्रा अनूषत गावो वत्सं न मातरः । इन्द्रं सोमस्य पीतये ॥

१४३१ ओ३म् अभि विप्रा अनूषत मूर्धन्यज्ञस्य कारवः । दधानाश्चक्षसि प्रियम् ॥

१४३२ ओ३म् अभीमृतस्य विष्टपं दुहते पृश्निमातरः । चारु प्रियतमं हविः ॥

१४३३ ओ३म् अमित्रहा विचर्षणिः पवस्व सोम शं गवे । देवेभ्यो अनुकामकृत् ॥

१४३४ ओ३म् अयं देवेषु जागृविः सुत एति पवित्र आ । सोमो याति विचर्षणिः ॥

१४३५ ओ३म् अयं सूर्य इवोपदृगयं सरांसि धावति । सप्त प्रवत आ दिवम् ॥

१४३६ ओ३म् अया चित्तो विपानया हरिः पवस्व धारया । युजं वाजेषु चोदय ॥

१४३७ ओ३म् अया निजघ्निरोजसा रथसंगे धने हिते । स्तवा अबिभ्युषा हृदा ॥

१४३८ ओ३म् अया पवस्व धारया यया सूर्यमरोचयः । हिन्वानो मानुषीरपः ॥

१४३९ ओ३म् अया सोमः सुकृत्यया महश्चिदभ्यवर्धत । मन्दान उद्वृषायते ॥

१४४० ओ३म् अयुक्त सूर एतशं पवमानो मनावधि । अन्तरिक्षेण यातवे ॥

१४४१ ओ३म् अरुषो जनयन्गिरः सोमः पवत आयुषक् । इन्द्रं गच्छन्कविक्रतुः ॥

१४४२ ओ३म् अवावशन्त धीतयो वृषभस्याधि रेतसि । सूनोर्वत्सस्य मातरः ॥

१४४३ ओ३म् अव्यो वारे परि प्रियो हरिर्वनेषु सीदति । रेभो वनुष्यते मती ॥

१४४४ ओ३म् अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः । वि नो राये दुरो वृधि ॥

१४४५ ओ३म् असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥

१४४६ ओ३म् असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः । विदाना अस्य योजनम् ॥

१४४७ ओ३म् अस्मभ्यं रोदसी रयिं मध्वो वाजस्य सातये । श्रवो वसूनि सं जितम् ॥

१४४८ ओ३म् अस्मभ्यमिन्दविन्द्रयुर्मध्वः पवस्व धारया । पर्जन्यो वृष्टिमाँ इव ॥

१४४९ ओ३म् अस्मे धेहि द्युमद्यशो मघवद्भ्यश्च मह्यं च । सनिं मेधामुत श्रवः ॥

१४५० ओ३म् अस्य प्रत्नामनु द्युतं शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिम् ॥

१४५१ ओ३म् अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण दिद्युते॥

१४५२ ओ३म् अचिक्रदद्वृषा हरिर्महान्मित्रो न दर्शतः। सं सूर्येण दिद्युते॥

१४५३ ओ३म् अच्छा समुद्रमिन्दवोऽस्तं गावो न धेनवः। अग्मन्नृतस्य योनिमा॥

१४५४ ओ३म् अत्या हियाना न हेतृभिरसृग्रं वाजसातये। वि वारमव्यमाशवः॥

१४५५ ओ३म् अतस्त्वा रयिरभ्ययद्राजानꣳ सुक्रतो दिवः। सुपर्णो अव्यथी भरत्॥

१४५६ ओ३म् अधा हिन्वान इन्द्रियं ज्यायो महित्वमानशे। अभिष्टिकृद्विचर्षणिः॥

१४५७ ओ३म् अधुक्षत प्रियं मधु धारा सुतस्य वेधसः। अपो वसिष्ट सुक्रतुः॥

१४५८ ओ३म् अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय। पुनाहीन्द्राय पातवे॥

१४५९ ओ३म् अध्वर्यो अद्रिभिः सुतꣳ सोमं पवित्र आ नय। पुनीहीन्द्राय पातवे॥

१४६० ओ३म् अनु प्रत्नास आयवः पदं नवीयो अक्रमुः । रुचे जनन्त सूर्यम्॥

१४६१ ओ३म् अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे॥

१४६२ ओ३म् अर्षा नः सोम शं गवे धुक्षस्व पिप्युषीमिषम्। वर्धा समुद्रमुक्थ्य॥

१४६३ ओ३म् अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ वनेष्वा॥

१४६४ ओ३म् अर्षा सोम द्युमत्तमोऽभि द्रोणानि रोरुवत्। सीदन्योनौ व नेष्वा॥

१४६५ ओ३म् अव्या वारे परि प्रियो हरिर्वनेषु सीदति। रेभो वनुष्यते मती॥

१४६६ ओ३म् असाव्यꣳ शुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्॥

१४६७ ओ३म् असाव्यꣳ शुर्मदायाप्सु दक्षो गिरिष्ठाः। श्येनो न योनिमासदत्॥

१४६८ ओ३म् असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः॥

१४६९ ओ३म् असृक्षत प्र वाजिनो गव्या सोमासो अश्वया। शुक्रासो वीरयाशवः॥

१४७० ओ३म् असृग्रमिन्दवः पथा धर्मन्नृतस्य सुश्रियः। विदाना अस्य योजना॥

१ २ ३ २ ३ ३उ ३ १ २ ३क २र ३ १ २र ३ १ २
१४७१ ओ३म् अस्य व्रतानि नाधृषे पवमानस्य दूढ्या। रुज यस्त्वा पृतन्यति॥

१ २ ३ २ ३ १ २ ३ १ २ ३क २र ३ २ १ २ ३ १ २
१४७२ ओ३म् असर्जि रथ्यो यथा पवित्रे चम्वोः सुतः। कार्ष्मन्वाजी न्यक्रमीत्॥

२ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
१४७३ ओ३म् अच्छा कोशं मधुश्चुतमसृग्रं वारे अव्यये। अवावशन्त धीतयः॥

२ ३ १ २ ३ २ ३ १ २ ३ १ २ २ ३ १ २ ३ १ २
१४७४ ओ३म् अप द्वारा मतीनां प्रत्ना ऋण्वन्ति कारवः। वृष्णो हरस आयवः॥

२ ३ २ ३ १ २ ३ १ २र ३ १ २ १ २ ३ १ २
१४७५ ओ३म् अव्या वारैः परि प्रियꣳ हरिꣳ हिन्वन्त्यद्रिभिः। पवमानं मधुश्चुतम्॥

२ ३ १ २ ३ २ ३ १ २र ३ २र १ २ ३ १ २र
१४७६ ओ३म् अश्वो न चक्रदो वृषा सं गा इन्दो समर्वतः। वि नो राये दुरो वृधि॥

३ १ २ ३ २उ ३ २ ३ १ २ २ ३ १ २ ३ २
१४७७ ओ३म् अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम्॥

३ १ २ ३ २उ ३ २ ३ १ २ २ ३ १ २ ३ २
१४७८ ओ३म् अपघ्नन्पवते मृधोऽप सोमो अराव्णः। गच्छन्निन्द्रस्य निष्कृतम्॥

३ १ २ ३ १ २
१४७९ ओ३म् अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम्॥

३ १ २ ३ १ २ ३ १ २ ३ २ ३ १ २र ३ १ २
१४८० ओ३म् अपघ्नन्पवसे मृधः क्रतुवित्सोम मत्सरः। नुदस्वादेवयुं जनम्॥

३ २ ३ १ २ ३ १ २ ३ १ २ १ २ ३ १ २
१४८१ ओ३म् अपघ्नन्तो अराव्णः पवमानाः स्वर्दृशः। योनावृतस्य सीदत॥

३ १ २र ३ २ ३ १ २ ३ १ २ १ २ ३ १ २
१४८२ ओ३म् अप्सा इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे॥

३ १ २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
१४८३ ओ३म् अभि गव्यानि वीतये नृम्णा पुनानो अर्षसि। सनद्वाजः परि स्रव॥

३ १ २र ३ २ ३ २ ३ १ २ ३ २ ३ १ २र
१४८४ ओ३म् अभि गावो अधन्विषुरापो न प्रवता यतीः। पुनाना इन्द्रमाशत॥

३ १ २र ३ १ २ ३ २ ३ २ ३ १ २ २ ३ १ २
१४८५ ओ३म् अभि द्रोणानि बभ्रवः शुक्रा ऋतस्य धारया। वाजं गोमन्तमक्षरन्॥

३ १ २र ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २र
१४८६ ओ३म् अभि ब्रह्मीरनूषत यह्वीर्ऋतस्य मातरः। मर्जयन्तीर्दिवः शिशुम्॥

३ १ २र ३ १ २ ३ २उ ३ १ २ २ ३ १ २ ३ १ २
१४८७ ओ३म् अभि विप्रा अनूषत गावो वत्सं न धेनवः। इन्द्रꣳ सोमस्य पीतये॥

१४८८ ओ३म् अभि ते मधुना पयोऽथर्वाणो अशिश्रयुः । देवं देवाय देवयु॥

१४८९ ओ३म् अभि प्रियं दिवस्पदमध्वर्युभिर्गुहा हितम्। सूरः पश्यति चक्षसा॥

१४९० ओ३म् अभि प्रिया दिवः कविउविप्रः स धारया सुतः। सोमो हिन्वे परावति ॥

१४९१ ओ३म् अभि प्रियाणि काव्या विश्वा चक्षाणो अर्षति। हरिस्तुञ्जान आयुधा॥

१४९२ ओ३म् अभ्यर्षानपच्युतो वाजिन्त्समत्सु सासहिः। अथा नो वस्यसस्कृधि॥

१४९३ ओ३म् अमित्रहा विचर्षणिः पवस्व सोम शं गवे। देवेभ्यो अनुकामकृत्॥

१४९४ ओ३म् अयं विचर्षणिर्हितः पवमानः स चेतति। हिन्वान आप्यं बृहत्॥

१४९५ ओ३म् अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः॥

१४९६ ओ३म् अया निजघ्निरोजसा रथसङ्गे धने हिते । स्तवा अबिभ्युषा हृदा॥

१४९७ ओ३म् अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः॥

१४९८ ओ३म् अया पवस्व धारया यया सूर्यमरोचयः। हिन्वानो मानुषीरपः॥

१४९९ ओ३म् अया सोम सुकृत्यपा महाउ।न्त्सन्नभ्यवर्धथाः। म न्दान इद्वृषायसे॥

१५०० ओ३म् अया चित्तो विपानया हरिः पवस्व धारया। युजं वाजेषु चोदय॥

१५०१ ओ३म् अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव॥

१५०२ ओ३म् अया वीती परि स्रव यस्त इन्दो मदेष्वा। अवाहन्नवतीर्नव॥

१५०३ ओ३म् अय२ सूर्य इवोपदृगय२ सरा२ सि धावति। सप्त प्रवत आ दिवम्॥

१५०४ ओ३म् अय२ स यो दिवस्परि रघुयामा पवित्र आ। सिन्धोरूर्मा व्यक्षरत्॥

१५०५ ओ३म् अस्मभ्यमिन्दविन्द्रियं मधोः पवस्व धारया। पर्जन्यो वृष्टिमाँ इव॥

१५०६ ओ३म् अस्मभ्यँ रोदसी रयिं मध्वो वाजस्य सातये। श्रवो वसूनि सञ्जितम्॥

१५०७ ओ३म् अस्य प्रत्नामनु द्युतँ शुक्रं दुदुह्रे अह्रयः। पयः सहस्रसामृषिम्॥

१५०८ ओ३म् अभ्यर्ष बृहद्यशो मघवद्भ्यो ध्रुवँ रयिम्। इषँ स्तोतृभ्य आ भर॥

१५०९ ओ३म् अभ्यर्ष स्वायुध सोम द्विबर्हसँ रयिम्। अथा नो वस्यसस्कृधि॥

१५१० ओ३म् आ कलशेषु धावति पवित्रे परि षिच्यते । उक्थैर्यज्ञेषु वर्धते ॥

१५११ ओ३म् आ कलशेषु धावति श्येनो वर्म वि गाहते । अभि द्रोणा कनिक्रदत् ॥

१५१२ ओ३म् आ दिवस्पृष्ठमश्वयुर्गव्ययुः सोम रोहसि । वीरयुः शवसस्पते ॥

१५१३ ओ३म् आ न इन्दो महीमिषं पवस्व विश्वदर्शतः । अस्मभ्यं सोम गातुवित् ॥

१५१४ ओ३म् आ न इन्दो शतग्विनं रयिं गोमन्तमश्विनम् । भरा सोम सहस्रिणम् ॥

१५१५ ओ३म् आ नः पवस्व धारया पवमान रयिं पृथुम् । यया ज्योतिर्विदासि नः ॥

१५१६ ओ३म् आ नः सोम सहो जुवो रूपं न वर्चसे भर । सुष्वाणो देववीतये ॥

१५१७ ओ३म् आ नः सोम पवित्र आ सृजता मधुमत्तमम् । देवेभ्यो देवश्रुत्तमम् ॥

१५१८ ओ३म् आ पवमान धारय रयिं सहस्रवर्चसम् । अस्मे इन्दो स्वाभुवम् ॥

१५१९ ओ३म् आ पवमान नो भरार्यो अदाशुषो गयम् । कृधि प्रजावतीरिषः ॥

१५२० ओ३म् आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥

१५२१ ओ३म् आ पवस्व मदिन्तम पवित्रं धारया कवे । अर्कस्य योनिमासदम् ॥

१५२२ ओ३म् आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत् । अश्वावद्वाजवत्सुतः ॥

१५२३ ओ३म् आ पवस्व सहस्रिणं रयिं गोमन्तमश्विनम् । पुरुश्चन्द्रं पुरुस्पृहम् ॥

१५२४ ओ३म् आ पवस्व हिरण्यवदश्वावत्सोम वीरवत् । वाजं गोमन्तमा भर ॥

१५२५ ओ३म् आ मित्रावरुणा भगं मध्वः पवन्त ऊर्मयः । विदाना अस्य शक्मभिः ॥

१५२६ ओ३म् आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे । तरत्स मन्दी धावति ॥

१५२७ ओ३म् आ योनिमरुणो रुहद्गमदिन्द्रं वृषा सुतः । ध्रुवे सदसि सीदति ॥

१५२८ ओ३म् आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः । आ योनिं धर्णसिः सदः ॥

१५२९ ओ३म् आत्सोम इन्द्रियो रसो वज्रः सहस्रसा भुवत् । उक्थं यदस्य जायते ॥

१५३० ओ३म् आदस्य शुष्मिणो रसे विश्वे देवा अमत्सत । यदी गोभिर्वसायते ॥

१५३१ ओ३म् आदीं हंसो यथा गणं विश्वस्यावीवशन्मतिम् । अत्यो न गोभिरज्यते ॥

१५३२ ओ३म् आपानासो विवस्वतो जनन्त उषसो भगम् । सूरा अण्वं वि तन्वते ॥

१५३३ ओ३म् आविवासन्परावतो अथो अर्वावतः सुतः । इन्द्राय सिच्यते मधु ॥

१५३४ ओ३म् आविशन्कलशं सुतो विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥

१५३५ ओ३म् आ नः सोम सहो जुवो रूपं न वर्चसे भर। सुष्वाणो देववीतये॥

१५३६ ओ३म् आ न इन्दो शातग्विनं गवां पोषं स्वश्व्यम्। वहा भगत्तिमूतये॥

१५३७ ओ३म् आ पवमान धारय रयिं सहस्रवर्चसम्। अस्मे इन्दो स्वाभुवम्॥

१५३८ ओ३म् आ पवमान सुष्टुतिं वृष्टिं देवेभ्यो दुवः। इषे पवस्व संयतम्॥

१५३९ ओ३म् आ पवस्व मदिन्तम पवित्रं धारया कवे। अर्कस्य योनिमासदम्॥

१५४० ओ३म् आ पवस्व महीमिषं गोमदिन्दो हिरण्यवत्। अश्ववत्सोम वीरवत्॥

१५४१ ओ३म् आ पवस्व सहस्रिणꣳ रयिꣳ सोम सुवीर्यम्। अस्मे श्रवाꣳसि धारय॥

१५४२ ओ३म् आ पवस्व सुवीर्यं मन्दमानः स्वायुध। इहो ष्विन्दवा गहि॥

१५४३ ओ३म् आ ययोस्त्रिꣳ शतं तना सहस्राणि च दद्महे। तरत्स मन्दी धावति॥

१५४४ ओ३म् आ योनिमरुणो रुहद्गमदिन्द्रो वृषा सुतम्। ध्रुवे सदसि सीदतु॥

१५४५ ओ३म् आ वच्यस्व महि प्सरो वृषेन्दो द्युम्नवत्तमः। आ योनिं धर्णसिः सदः॥

१५४६ ओ३म् आदीꣳ त्रितस्य योषणो हरिꣳ हिन्वन्त्यद्रिभिः । इन्दुमिन्द्राय पीतये॥

१५४७ ओ३म् आदीꣳ हꣳ सो यथा गणं विश्वस्यावीवशन्मतिम्। अत्यो न गोभिरज्यते॥

१५४८ ओ३म् आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम्॥

१५४९ ओ३म् आ ते दक्षं मयोभुवं वह्निमद्या वृणीमहे। पान्तमा पुरुस्पृहम्॥

१५५० ओ३म् आ मित्रे वरुणे भगे मधोः पवन्त उर्मयः। विदाना अस्य शक्मभिः॥

१५५१ ओ३म् आ मन्द्रमा वरेण्यमा विप्रमा मनीषिणम्। पान्तमा पुरुस्पृहम्॥

१५५२ ओ३म् आ रयिमा सुचेतुनमा सुक्रतो तनूष्वा। पान्तमा पुरुस्पृहम्॥

१५५३ ओ३म् आदीमश्वं न हेतारमशूशुभन्नमृताय। मधो रसꣳ सधमादे॥

१५५४ ओ३म् आपानासो विवस्वतो जिन्वन्त उषसो भगम्। सूरा अण्वं वि तन्वते॥

१५५५ ओ३म् आविशन्कलशꣳ सुतो विश्वा अर्षन्नभि श्रियः। इन्दुरिन्द्राय धीयते॥

१५५६ ओ३म् आविवासन्परावतो अथो अर्वावतः सुतः। इन्द्राय सिच्यते मधु॥

१५५७ ओ३म् आशुरर्ष बृहन्मते परि प्रियेण धाम्ना। यत्रा देवा इति ब्रुवन्॥

१५५८ ओ३म् इन्दुरत्यो न वाजसृत्कनिक्रन्ति पवित्र आ । यदक्षारति देवयुः ॥

१५५९ ओ३म् इन्दुर्हियानः सोतृभिर्मृज्यमानः कनिक्रदत् । इयर्ति वग्नुमिन्द्रियम् ॥

१५६० ओ३म् इन्दो यथा तव स्तवो यथा ते जातमन्धसः । नि बर्हिषि प्रिये सदः ॥

१५६१ ओ३म् इन्दो समुद्रमीङ्खय पवस्व विश्वमेजय । रायो धर्ता न ओजसा ॥

१५६२ ओ३म् इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय । ऋतस्य योनिमासदम् ॥

१५६३ ओ३म् इन्द्रस्य सोम राधसे शं पवस्व विचर्षणे । प्रजावद्रेत आ भर ॥

१५६४ ओ३म् इन्द्राय सोम पातवे मदाय परि षिच्यसे । मनश्चिन्मनसस्पतिः ॥

१५६५ ओ३म् इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । ऋतस्य योनिमासदम् ॥

१५६६ ओ३म् इषं तोकाय नो दधदस्मभ्यं सोम विश्वतः । आ पवस्व सहस्रिणम् ॥

१५६७ ओ३म् इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि ॥

१५६८ ओ३म् इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः। सृजदश्वꣳ रथीरिव॥

१५६९ ओ३म् इन्द्राय सोम पातवे मदाय परि षिच्यसे। मनश्चिन्मनसस्पतिः॥

१५७० ओ३म् इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम्॥

१५७१ ओ३म् इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः। अर्कस्य योनिमासदम्॥

१५७२ ओ३म् इन्द्रस्य सोम राधसे पुनानो हार्दि चोदय। देवानां योनिमासदम्॥

१५७३ ओ३म् इषं तोकाय नो दधदस्मभ्यꣳ सोम विश्वतः। आ पवस्व सहस्रिणम्॥

१५७४ ओ३म् इन्दो यदद्रिभिः सुतः पवित्रं परिदीयसे। अरमिन्द्रस्य धाम्ने॥

१५७५ ओ३म् इन्दो यथा तव स्तवो यथा ते जातमन्धसः। नि बर्हिषि प्रिये सदः॥

१५७६ ओ३म् इन्द्रः स दामने कृत ओजिष्ठः स बले हितः। द्युम्नी श्लोकी स सोम्यः॥

१५७७ ओ३म् इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि॥

१५७८ ओ३म् इषे पवस्व धारया मृज्यमानो मनीषिभिः । इन्दो रुचाभि गा इहि॥

१५७९ ओ३म् उत त्या हरितो दश सूरो अयुक्त यातवे । इन्दुरिन्द्र इति ब्रुवन् ॥

१५८० ओ३म् उत त्वामरुणं वयं गोभिरञ्जो मदाय कम् । वि नो राये दुरो वृधि ॥

१५८१ ओ३म् उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः । गृणानो जमदग्निना ॥

१५८२ ओ३म् उतो सहस्रभर्णसं वाचं सोम मखस्युवम् । पुनान इन्दवा भर ॥

१५८३ ओ३म् उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः । वाणस्य चोदया पविम् ॥

१५८४ ओ३म् उप प्रियं पनिप्नतं युवानमाहुतीवृधम् । अगन्म बिभ्रतो नमः ॥

१५८५ ओ३म् उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषुः ॥

१५८६ ओ३म् उभे सोमावचाकशन्मृगो न तक्तो अर्षसि । सीदन्नृतस्य योनिमा ॥

१५८७ ओ३म् उपास्मै गायता नरः पवमानायेन्दवे॥ अभि देवाꣳ इयक्षते ॥

१५८८ ओ३म् उपास्मै गायता नरः पवमानायेन्दवे। अभि देवाꣳ इयक्षते॥

१५८९ ओ३म् उप शिक्षापतस्थुषो भियसमा धेहि शत्रवे। पवमान विदा रयिम्॥

१५९० ओ३म् उत्ते शुष्मास ईरते सिन्धोरूर्मेरिव स्वनः। वाणस्य चोदया पविम्॥

१५९१ ओ३म् उत्ते शुष्मासो अस्थू रक्षो भिन्दन्तो अद्रिवः। नुदस्व याः परिस्पृधः॥

१५९२ ओ३म् उपो षु जातमप्तुरं । गोभिर्भङ्गं परिष्कृतम् । इन्दुं देवा अयासिषु॥

१५९३ ओ३म् उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम्। इन्दुं देवा अयासिषु॥

१५९४ ओ३म् उपो षु जातमप्तुरं गोभिर्भङ्गं परिष्कृतम्। इन्दुं देवा अयासिषुः॥

१५९५ ओ३म् उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रꣳ शर्म महि श्रवः॥

१५९६ ओ३म् उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे। उग्रꣳ शर्म महि श्रवः॥

१५९७ ओ३म् उत नो गोविदश्ववित्पवस्व सोमान्धसा। मक्षूतमेभिरहभिः॥

१५९८ ओ३म् उत नो गोमतीरिषो विश्वा अर्ष परिष्टुभः। गृणानो जमदग्निना॥

१५९९ ओ३म् उत नो वाजसातये पवस्व बृहतीरिषः। द्युमदिन्दो सुवीर्यम्॥

१६०० ओ३म् उत त्या हरितो रथे सूरो अयुक्त यातवे। इन्दुरिन्द्र इति ब्रुवन्॥

१६०१ ओ३म् उस्रा वेद वसूनां मर्त्तस्य देव्यवसः। तरत्स मन्दी धावति॥

१६०२ ओ३म् ऋधक्सोम स्वस्तये संजग्मानो दिवा कवे। पवस्व सूर्यो दृशे॥

१६०३ ओ३म् एत उ त्ये अवीवशन्काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिम् ॥

१६०४ ओ३म् एतं त्यं हरितो दश मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भते ॥

१६०५ ओ३म् एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम् । समादित्येभिरख्यत ॥

१६०६ ओ३म् एते वाता इवोरवः पर्जन्यस्येव वृष्टयः । अग्नेरिव भ्रमा वृथा ॥

१६०७ ओ३म् एते सोमा असृक्षत गृणानाः श्रवसे महे । मदिन्तमस्य धारया ॥

१६०८ ओ३म् एते सोमास आशवो रथा इव प्र वाजिनः । सर्गाः सृष्टा अहेषत ॥

१६०९ ओ३म् एते सोमास इन्दवः प्रयस्वन्तश्चमू सुताः । इन्द्रं वर्धन्ति कर्मभिः ॥

१६१० ओ३म् एवा पुनान इन्द्रयुर्मदं मदिष्ठ वीतये । गुहा चिद्दधिषे गिरः ॥

१६११ ओ३म् एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः । धारया पवते सुतः ॥

१६१२ ओ३म् एष गव्युरचिक्रदत्पवमानो हिरण्ययुः । इन्दुः सत्राजिदस्तृतः ॥

१६१३ ओ३म् एष तुन्नो अभिष्टुतः पवित्रमति गाहते । रक्षोहा वारमव्ययम् ॥

१६१४ ओ३म् एष दिवं वि धावति तिरो रजांसि धारया । पवमानः कनिक्रदत् ॥

१६१५ ओ३म् एष देवो रथर्यति पवमानो दशस्यति । आविष्कृणोति वग्वनुम् ॥

१६१६ ओ३म् एष देवो विपन्युभिः पवमान ऋतायुभिः । हरिर्वाजाय मृज्यते ॥

१६१७ ओ३म् एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः । सोमो वनेषु विश्ववित् ॥

१६१८ ओ३म् एष पुरू धियायते बृहते देवतातये । यत्रामृतास आसते ॥

१६१९ ओ३म् एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति ॥

१६२० ओ३म् एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः । अव्यो वारं वि धावति ॥

१६२१ ओ३म् एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः । अभि द्रोणानि धावति ॥

१६२२ ओ३म् एष वृषा वृषव्रतः पवमानो अशस्तिहा । करद्वसूनि दाशुषे ॥

१६२३ ओ३म् एष सूर्यमरोचयत्पवमानो विचर्षणिः । विश्वा धामानि विश्ववित् ॥

१६२४ ओ३म् एष सूर्येण हासते पवमानो अधि द्यवि । पवित्रे मत्सरो मदः ॥

१६२५ ओ३म् एष स्य परि षिच्यते मर्मृज्यमान आयुभिः । उरुगायः कविक्रतुः ॥

१६२६ ओ३म् एतं मृजन्ति मर्ज्यमुप द्रोणेष्वायवः। प्रचक्राणं महीरिषः॥

१६२७ ओ३म् एतं त्रितस्य योषणो हरिँ हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये॥

१६२८ ओ३म् एतं त्यँ हरितो दश मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भते॥

१६२९ ओ३म् एते सोमा असृक्षत गृणानाः शवसे महे। मदिन्तमस्य धारया॥

१६३० ओ३म् एते सोमा अभि प्रियमिन्द्रस्य काममक्षरन्। वर्धन्तो अस्य वीकयम्॥

१६३१ ओ३म् एत असृग्रमिन्दवस्तिरः पवित्रमाशवः। विश्वान्यभि सौभगा॥

१६३२ ओ३म् एतमु त्यं दश क्षिपो मृजन्ति सिन्धुमातरम्। समादित्येभिरख्यत॥

१६३३ ओ३म् एतमु त्यं दश क्षिपो हरिँ हिन्वन्ति यातवे। स्वायुधं मदिन्तमम्॥

१६३४ ओ३म् एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे॥

१६३५ ओ३म् एना विश्वान्यर्य आ द्युम्नानि मानुषाणाम्। सिषासन्तो वनामहे॥

१६३६ ओ३म् एवा ह्यसि वीरयुरेवा शूर उत स्थिरः । एवा ते राध्यं मनः॥

१६३७ ओ३म् एवा रातिस्तुविमघ विश्वेभिर्धायि धातृभिः। अधा चिदिन्द्र नः सचा॥

१६३८ ओ३म् एष वसूनि पिब्दनः परुषा ययिवाँ अति। अव शादेषु गच्छति॥

१६३९ ओ३म् एष विप्रैरभिष्टुतोऽपो देवो वि गाहते। दधद्रत्नानि दाशुषे॥

१६४० ओ३म् एष विश्वानि वार्या शूरो यन्निव सत्वभिः। पवमानः सिषासति॥

१६४१ ओ३म् एष श्रृङ्गाणि दोधुवच्छिशीते यूथ्योऽ. वृषा। नृम्णा दधान ओजसा॥

१६४२ ओ३म् एष सूर्येण हासते संवसानो विवस्वता। पतिर्वाचो अदाभ्यः॥

१६४३ ओ३म् एष सूर्यमरोचयत्पवमानो अधि द्यवि। पवित्रे मत्सरो मदः॥

१६४४ ओ३म् एष स्य मानुषीष्वा श्येनो न विक्षु सीदति। गच्छं जारो न योषितम्॥

१६४५ ओ३म् एष उ स्य पुरुव्रतो जज्ञानो जनयन्निषः। धारया पवते सुतः॥

१६४६ ओ३म् एष उ स्य वृषा रथोऽव्या वारेभिरव्यत। गच्छन्वाजꣳ सहस्रिणम्॥

१६४७ ओ३म् एष कविरभिष्टुतः पवित्रे अधि तोशते। पुनानो घ्नन्नप द्विषः॥

१६४८ ओ३म् एष गव्युरचिक्रदत्पवमानो हिरण्ययुः। इन्दुः सत्राजिदस्तृतः॥

१६४९ ओ३म् एष देवः शुभायतेऽधि योनावमर्त्यः। वृत्रहा देववीतमः॥

१६५० ओ३म् एष देवो अमर्त्यः पर्णवीरिव दीयते। अभि द्रोणान्यासदम्॥

१६५१ ओ३म् एष देवो रथर्यति पवमानो दिशस्यति। आविष्कृणोति वग्वनुम्॥

१६५२ ओ३म् एष देवो विपन्युभिः पवमान ऋतायुभिः। हरिर्वाजाय मृज्यते॥

१६५३ ओ३म् एष देवो विपा कृतोऽति ह्वराꣳसि धावति। पवमानो अदाभ्यः॥

१६५४ ओ३म् एष धिया यात्यण्व्या शूरो रथेभिराशुभिः। गच्छन्निन्द्रस्य निष्कृतम्॥

१६५५ ओ३म् एष पुरू धियायते बृहते देवतातये। यत्रामृतास आशत॥

१६५६ ओ३म् एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति॥

१६५७ ओ३म् एष प्रत्नेन जन्मना देवो देवेभ्यः सुतः। हरिः पवित्रे अर्षति॥

१६५८ ओ३म् एष प्रत्नेन मन्मना देवो देवेभ्यस्परि। कविर्विप्रेण वावृधे॥

१६५९ ओ३म् एष पवित्रे अक्षरत्सोमो देवेभ्यः सुतः। विश्वा धामान्याविशन्॥

१६६० ओ३म् एष रुक्मिभिरीयते वाजी शुभ्रेभिरꣳ शुभिः। पतिः सिन्धूनां भवन्॥

१६६१ ओ३म् एष वाजी हितो नृभिर्विश्वविन्मनसस्पतिः। अव्यं वारं वि धावति॥

१६६२ ओ३म् एष शुष्म्यदाभ्यः सोमः पुनानो अर्षति। देवावीरघशꣳ सहा॥

१६६३ ओ३म् एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः। पुनान इन्दुरिन्द्रमा॥

१६६४ ओ३म् एष हितो वि नीयतेऽन्तः शुन्ध्यावता पथा। यदी तुञ्जन्ति भूर्णयः॥

१६६५ ओ३म् एष इन्द्राय वायवे स्वर्जित्परि षिच्यते। पवित्रे दक्षसाधनः॥

१६६६ ओ३म् एष दिवं वि धावति तिरो रजाꣳ सि धारया। पवमानः कनिक्रदत्॥

१६६७ ओ३म् एष दिवं व्यासरत्तिरो रजाꣳ स्यस्तृतः। पवमानः स्वध्वरः॥

१६६८ ओ३म् एष नृभिर्वि नीयते दिवो मूर्धा वृषा सुतः। सोमो वनेषु विश्ववित्॥

१६६९ ओ३म् एष वृषा कनिक्रदद्दशभिर्जामिभिर्यतः। अभि द्रोणानि धावति॥

१६७० ओ३म् एष स्य पीतये सुतो हरिरर्षति धर्णसिः। क्रन्दन्योनिमभि प्रियम्॥

१६७१ ओ३म् एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः। य इन्दुर्वारमाविशत्॥

१६७२ ओ३म् कृण्वन्तो वरिवो गवेऽभ्यर्षन्ति सुष्टुतिम्। इडामस्मभ्यꣳ संयतम्॥

१६७३ ओ३म् केतुं कृण्वं दिवस्परि विश्वा रूपाभ्यर्षसि। समुद्रः सोम पिन्वसे॥

१६७४ ओ३म् क्रीडुर्मखो न मꣳ हयुः पवित्रꣳ सोम गच्छसि। दधत्स्तोत्रे सुवीर्यम्॥

१६७५ ओ३म् कविमिव प्रशꣳस्यं यं देवास इति द्विता। नि मर्त्येष्वादधुः॥

१६७६ ओ३म् गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः । याभिर्मदाय शुम्भसे ॥

१६७७ ओ३म् गिरा जात इह स्तुत इन्दुरिन्द्राय धीयते । विर्योना वसताविव ॥

१६७८ ओ३म् गिरा यदी सबन्धवः पञ्च व्राता अपस्यवः । परिष्कृण्वन्ति धर्णसिम् ॥

१६७९ ओ३म् गिरस्त इन्द ओजसा मर्मृज्यन्ते अपस्युवः। याभिर्मदाय शुम्भसे॥

१६८० ओ३म् गिराउ वज्रो न सम्भृतः सबलो अनपच्युतः। ववक्ष उग्रो अस्तृतः॥

१६८१ ओ३म् गोमन्नः सोम वीरवदश्वावद्वाजवत्सुतः । पवस्व बृहतीरिषः ॥

१६८२ ओ३म् गोषा इन्दो नृषा अस्यश्वसा वाजसा उत। आत्मा यज्ञस्य पूर्व्यः॥

१६८३ ओ३म् घृतं पवस्व धारया यज्ञेषु देववीतमः । अस्मभ्यं वृष्टिमा पव ॥

१६८४ ओ३म् घृतं पवस्व धारया यज्ञेषु देववीतमः। अस्मभ्यं वृष्टिमा पव॥

१६८५ ओ३म् जघ्निर्वृत्रममित्रियं सस्निर्वाजं दिवेदिवे । गोषा उ अश्वसा असि ॥

१६८६ ओ३म् जुष्ट इन्द्राय मत्सरः पवमान कनिक्रदत् । विश्वा अप द्विषो जहि ॥

१६८७ ओ३म् जुष्ट इन्द्राय मत्सरः पवमानः कनिक्रदत्। विश्वा अप द्विषो जहि॥

१६८८ ओ३म् जघ्निर्वृत्रममित्रियꣳ सस्निर्वाजं दिवेदिवे। गोषातिरश्वसा असि॥

१६८९ ओ३म् जज्ञानो वाचमिष्यसि पवमान विधर्मणि। क्रन्दं देवो न सूर्यः॥

१६९० ओ३म् तं गावो अभ्यनूषत सहस्रधारमक्षितम् । इन्दुं धर्तारमा दिवः ॥

१६९१ ओ३म् तं गीर्भिर्वाचमीङ्खयं पुनानं वासयामसि । सोम जनस्य गोपतिम् ॥

१६९२ ओ३म् तं गोभिर्वृषणं रसं मदाय देववीतये । सुतं भराय सं सृज ॥

१६९३ ओ३म् तं त्रिपृष्ठे त्रिवन्धुरे रथे युञ्जन्ति यातवे । ऋषीणां सप्त धीतिभिः ॥

१६९४ ओ३म् तं त्वा नृम्णानि बिभ्रतं सधस्थेषु महो दिवः । चारुं सुकृत्ययेमहे ॥

१६९५ ओ३म् तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे । तव प्रशस्तयो महीः ॥

१६९६ ओ३म् तं त्वा सहस्रचक्षसमथो सहस्रभर्णसम् । अति वारमपाविषुः ॥

१६९७ ओ३म् तं त्वा हिन्वन्ति वेधसः पवमान गिरावृधम् । इन्दविन्द्राय मत्सरम् ॥

१६९८ ओ३म् तं नो विश्वा अवस्युवो गिरः शुम्भन्ति पूर्वथा । इन्दुमिन्द्राय पीतये ॥

१६९९ ओ३म् तं सोतारो धनस्पृतमाशुं वाजाय यातवे । हरिं हिनोत वाजिनम् ॥

१७०० ओ३म् तं हिन्वन्ति मदच्युतं हरिं नदीषु वाजिनम् । इन्दुमिन्द्राय मत्सरम् ॥

१७०१ ओ३म् तं त्वा धर्त्तारमोण्योः पवमान स्वर्दृशम्। हिन्वे वाजेषु वाजिनम्॥

१७०२ ओ३म् तं त्वा नृम्णानि बिभ्रत२ सधस्थेषु महो दिवः। चारु२ सुकृत्ययेमहे॥

१७०३ ओ३म् तं त्वा मदाय घृष्वय उ लोककृत्नुमीमहे। तव प्रशस्तये महे॥

१७०४ ओ३म् तं त्वा विप्रा वचोविदः परिष्कृण्वन्ति धर्णसिम्। सं त्वा मृजन्त्यायवः॥

१७०५ ओ३म् तं दुरोषमभीनरः सोमं विश्वाच्या धिया। यज्ञाय सन्त्वद्रयः॥

१७०६ ओ३म् तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदंसनिः ॥

१७०७ ओ३म् तमु त्वा वाजिनं नरो धीभिर्विप्रा अवस्यवः । मृजन्ति देवतातये ॥

१७०८ ओ३म् तया पवस्व धारया यया गाव इहागमन् । जन्यास उप नो गृहम् ॥

१७०९ ओ३म् तव प्रत्नेभिरध्वभिरव्यो वारे परि प्रियः । सहस्रधारो यात्तना ॥

१७१० ओ३म् तव विश्वे सजोषसो देवासः पीतिमाशत । मदेषु सर्वधा असि ॥

१७११ ओ३म् तव शुक्रासो अर्चयो दिवस्पृष्ठे वि तन्वते । पवित्रं सोम धामभिः ॥

१७१२ ओ३म् तवेमे सप्त सिन्धवः प्रशिषं सोम सिस्रते । तुभ्यं धावन्ति धेनवः ॥

१७१३ ओ३म् तस्य ते वाजिनो वयं विश्वा धनानि जिग्युषः । सखित्वमा वृणीमहे ॥

१७१४ ओ३म् ता अभि सन्तमस्तृतं महे युवानमा दधुः । इन्दुमिन्द्र तव व्रते ॥

१७१५ ओ३म् ताभ्यां विश्वस्य राजसि ये पवमान धामनी । प्रतीची सोम तस्थतुः ॥

१७१६ ओ३म् तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥

१७१७ ओ३म् तिस्रोउ। वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्॥

१७१८ ओ३म् तिस्रो वाच उदीरते गावो मिमन्ति धेनवः। हरिरेति कनिक्रदत्॥

१७१९ ओ३म् तुभ्यं गावो घृतं पयो बभ्रो दुदुह्रे अक्षितम् । वर्षिष्ठे अधि सानवि ॥

१७२० ओ३म् तुभ्यं वाता अभिप्रियस्तुभ्यमर्षन्ति सिन्धवः । सोम वर्धन्ति ते महः ॥

१७२१ ओ३म् तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे । तुभ्यमर्षन्ति सिन्धवः ॥

१७२२ ओ३म् तुभ्येमा भुवना कवे महिम्ने सोम तस्थिरे। तुभ्यं धावन्ति धेनवः ॥

१७२३ ओ३म् ते नः सहस्रिणं रयिं पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥

१७२४ ओ३म् ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम् । सुवाना देवास इन्दवः ॥

१७२५ ओ३म् ते नः सहस्रिण२ रयिं पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः॥

१७२६ ओ३म् ते नो वृष्टिं दिवस्परि पवन्तामा सुवीर्यम्। स्वाना देवास इन्दवः॥

१७२७ ओ३म् ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या॥

१७२८ ओ३म् त्वं यविष्ठ दाशुषो नॄꣳः पाहि शृणुही गिरः। रक्षा तोकमुत त्मना॥

१७२९ ओ३म् त्वं विप्रस्त्वं कविउमधु प्र जातमन्धसः। मदेषु सर्वधा असि॥

१७३० ओ३म् त्वां यज्ञैरवीवृधन्पवमान विधर्मणि। अथा नो वस्यसस्कृधि॥

१७३१ ओ३म् त्वे विश्वे सजोषसो देवासः पीतिमाशत। मदेषु सर्वधा असि॥

१७३२ ओ३म् त्वꣳ राजेव सुव्रतो गिरः सोमाविवेशिथ। पुनानो वह्ने अद्भुत॥

१७३३ ओ३म् त्वꣳ सुष्वाणो अद्रिभिरभ्यर्ष कनिक्रदत्। द्युमन्तꣳ शुष्ममा भर॥

१७३४ ओ३म् त्वꣳ सोम नृमादनः पवस्व चर्षणीधृतिः। सस्निर्यो अनुमाद्यः॥

१७३५ ओ३म् त्वꣳ सोमासि धारयुर्मन्द्र ओजिष्ठो अध्वरे। पवस्व मꣳहयद्रयिः॥

१७३६ ओ३म् त्वꣳ सोम परि स्रव स्वादिष्ठो अङ्गिरोभ्यः। वरिवोविद्घृतं पयः॥

१७३७ ओ३म् त्वꣳ सूर्ये न आ भज तव क्रत्वा तवोतिभिः। अथा नो वस्यसस्कृधि॥

१७३८ ओ३म् त्वꣳ समुद्रिया अपोऽग्रियो वाच ईरयन्। पवस्व विश्वचर्षणे॥

१७३९ ओ३म् त्वꣳ सुतो मदिन्तमो दधन्वान्मत्सरिन्तमः। इन्दुः सत्राजिदस्तृतः॥

१७४० ओ३म् तमिद्वर्धन्तु नो गिरो वत्सꣳ सꣳशिश्वरीरिव। य इन्द्रस्य हृदꣳ सनिः॥

१७४१ ओ३म् तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे। स वृषा वृषभो भुवत्॥

१७४२ ओ३म् तया पवस्व धारया यया गाव इहागमन्। जन्यास उप नो गृहम्॥

१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ २ ३ १ २ ३ २
१७४३ ओ३म् तꣳ हिन्वन्ति मदच्युतꣳ हरिं नदीषु वाजिनम्। इन्दुमिन्द्राय मत्सरम्॥

२ ३ २ ३ १ २ ३ १ २ ३ १ २र २ ३ २ ३ १ २
१७४४ ओ३म् तरत्स मन्दी धावति धारा सुतस्यान्धसः । तरत्स मन्दी धावति॥

२ ३ २ ३ १ २ ३ १ २ ३ १ २र २ ३ २ ३ १ २
१७४५ ओ३म् तरत्स मन्दी धावति धारा सुतस्यान्धसः। तरत्स मन्दी धावति॥

२ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ १ २ ३ १ २
१७४६ ओ३म् तव क्रत्वा तवोतिभिर्ज्योक्पश्येम सूर्यम्। अथा नो वस्यसस्कृधि॥

२ ३ १ २ ३ १ २ ३ २उ ३ २र १ २ ३ १ २
१७४७ ओ३म् तव त्य इन्दो अन्धसो देवा मधोकव्याशत। पवमानस्य मरुतः॥

१७४८ ओ३म् दि॒वः पी॒यूष॑मु॒त्तमं॒ सोम॒मिन्द्रा॑य व॒ज्रिणे॑ । सु॒नोता॒ मधु॑मत्तमम् ॥

१७४९ ओ३म् दि॒वो न सानु॑ पि॒प्युषी॒ धारा॑ सु॒तस्य॑ वे॒धसः॑ । वृथा॑ प॒वित्रे॑ अर्षति ॥

३ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ २ ३ १ २
१७५० ओ३म् दिवः पीयूषमुत्तम सोममिन्द्राय वज्रिणे। सुनोता मधुमत्तमम्॥

३ १ २र ३ २ ३ १ २ २ ३ २ ३ १ २ ३ २
१७५१ ओ३म् दिवो नाभा विचक्षणोऽव्या वारे महीयते। सोमो यः सुक्रतुः कविः॥

१७५२ ओ३म् दु॒हा॒नः प्र॒त्नमित्पयः॑ प॒वित्रे॒ परि॑ षिच्यते । क्रन्द॑न्दे॒वाँ अ॑जीजनत् ॥

३ २ ३ १ २र ३ २ ३ १ २ १ २ ३ १ २
१७५३ ओ३म् दुहानः प्रत्नमित्पयः पवित्रे परि षिच्यसे। क्रन्दं देवाꣳ अजीजनः॥

३ १ २ ३ १ २ ३ १ २ ३ १ २र ३क २र १ २र
१७५४ ओ३म् देवेभ्यस्त्वा मदाय कꣳ सृजानमति मेष्यः। सं गोभिर्वासयामसि॥

१ २ ३ १ २ ३ १ २ ३ २ १ २ ३ २ २र
१७५५ ओ३म् दविद्युतत्या रुचा परिष्टोभन्त्या कृपा। सोमाः शुक्रा गवाशिरः॥

३ १ २ ३ २ ३ २ ३ १ २ २ ३ २ ३ १ २
१७५६ ओ३म् ध्वस्रयोः पुरुषन्त्योरा सहस्राणि दद्महे। तरत्स मन्दी धावति॥

१७५७ ओ३म् न त्वां श॒तं च॒न ह्रुतो॒ राधो॒ दित्स॑न्त॒मा मि॑नन् । यत्पु॑ना॒नो म॑ख॒स्यसे॑ ॥

१७५८ ओ३म् न॒प्तीभि॒र्यो वि॒वस्व॑तः शु॒भ्रो न मा॑मृ॒जे युवा॑ । गाः कृ॑ण्वा॒नो न नि॒र्णिज॑म् ॥

१७५९ ओ३म् नम॒सेदुप॑ सीदत द॒ध्नेद॒भि श्री॑णीतन । इन्दु॒मिन्द्रे॑ दधातन ॥

१७६० ओ३म् नाभा नाभिं न आ ददे चक्षुषा सूर्यं दृशे। कवेरपत्यमा दुहे॥

१७६१ ओ३म् नित्यस्तोत्रो वनस्पतिर्धीनामन्तः सबर्दुघः । हिन्वानो मानुषा युगा ॥

१७६२ ओ३म् नित्यस्तोत्रो वनस्पतिर्धेनामन्तः सबर्दुघाम्। हिन्वानो मानुषा युजा॥

१७६३ ओ३म् नू नव्यसे नवीयसे सूक्ताय साधया पथः । प्रत्नवद्रोचया रुचः ॥

१७६४ ओ३म् नू नो रयिं महामिन्दोऽस्मभ्यꣳ सोम विश्वतः। आ पवस्व सहस्रिणम्॥

१७६५ ओ३म् नृचक्षसं त्वा वयमिन्द्रपीतꣳ स्वर्विदम्। भक्षीमहि प्रजामिषम्॥

१७६६ ओ३म् न त्वा शतं च न ह्रुतो राधो दित्सन्तमा मिनन्। यत्पुनानो मखस्यसे॥

१७६७ ओ३म् नमसेदुप सीदत दध्नेदभि श्रीणीतन। इन्दुमिन्द्रे दधातन॥

१७६८ ओ३म् परि णो अश्वमश्वविद्गोमदिन्दो हिरण्यवत् । क्षरा सहस्रिणीरिषः ॥

१७६९ ओ३म् परि णो देववीतये वाजाँ अर्षसि गोमतः । पुनान इन्दविन्द्रयुः ॥

१७७० ओ३म् परि धामानि यानि ते त्वं सोमासि विश्वतः । पवमान ऋतुभिः कवे ॥

१७७१ ओ३म् परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारं बिभ्रत्पुरुस्पृहम् ॥

१७७२ ओ३म् परि प्रिया दिवः कविर्वयांसि नप्त्योर्हितः । सुवानो याति कविक्रतुः ॥

१७७३ ओ३म् परि यो रोदसी उभे सद्यो वाजेभिरर्षति । मदेषु सर्वधा असि ॥

१७७४ ओ३म् परि वाजे न वाजयुमव्यो वारेषु सिञ्चत । इन्द्राय मधुमत्तमम् ॥

१७७५ ओ३म् परि विश्वानि चेतसा मृशसे पवसे मती । स नः सोम श्रवो विदः ॥

१७७६ ओ३म् परि सोम ऋतं बृहदाशुः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥

१७७७ ओ३म् परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः । वृष्टिं दिवः परि स्रव ॥

१७७८ ओ३म् परीतो वायवे सुतं गिर इन्द्राय मत्सरम् । अव्यो वारेषु सिञ्चत ॥

१७७९ ओ३म् पवते हर्यतो हरिर्गृणानो जमदग्निना । हिन्वानो गोरधि त्वचि ॥

१७८० ओ३म् पवन्ते वाजसातये सोमाः सहस्रपाजसः । गृणाना देववीतये ॥

१७८१ ओ३म् पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत् । कृष्णा तमांसि जङ्घनत् ॥

१७८२ ओ३म् पवमान ऋतः कविः सोमः पवित्रमासदत् । दधत्स्तोत्रे सुवीर्यम् ॥

१७८३ ओ३म् पवमान विदा रयिमस्मभ्यं सोम दुष्टरम् । यो दूणाशो वनुष्यता ॥

१७८४ ओ३म् पवमान विदा रयिमस्मभ्यं सोम सुश्रियम् । इन्दो सहस्रवर्चसम् ॥

१७८५ ओ३म् पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु नः ॥

१७८६ ओ३म् पवमानः सुतो नृभिः सोमो वाजमिवासरत् । चमूषु शक्मनासदम् ॥

१७८७ ओ३म् पवमानमवस्यवो विप्रमभि प्र गायत । सुष्वाणं देववीतये ॥

१७८८ ओ३म् पवमानस्य जङ्घ्नतो हरेश्चन्द्रा असृक्षत । जीरा अजिरशोचिषः ॥

१७८९ ओ३म् पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वन्तो न श्रवस्यवः ॥

१७९० ओ३म् पवमानस्य ते रसो मदो राजन्नदुच्छुनः । वि वारमव्यमर्षति ॥

१७९१ ओ३म् पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत । सूर्यस्येव न रश्मयः ॥

१७९२ ओ३म् पवमानास आशवः शुभ्रा असृग्रमिन्दवः । घ्नन्तो विश्वा अप द्विषः ॥

१७९३ ओ३म् पवमानास इन्दवस्तिरः पवित्रमाशवः । इन्द्रं यामेभिराशत ॥

१७९४ ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥

१७९५ ओ३म् पवमानो अभि स्पृधो विशो राजेव सीदति । यदीमृण्वन्ति वेधसः ॥

१७९६ ओ३म् पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः । हरिश्चन्द्रो मरुद्गणः ॥

१७९७ ओ३म् पवस्व गोजिदश्वजिद्विश्वजित्सोम रण्यजित् । प्रजावद्रत्नमा भर ॥

१७९८ ओ३म् पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मदः ॥

१७९९ ओ३म् पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने । विश्वा अप द्विषो जहि ॥

१८०० ओ३म् पवीतारः पुनीतन सोममिन्द्राय पातवे । अथा नो वस्यसस्कृधि ॥

१८०१ ओ३म् पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥

१८०२ ओ३म् पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः । शुम्भन्ति विप्रं धीतिभिः ॥

१८०३ ओ३म् पुनानो देववीतय इन्द्रस्य याहि निष्कृतम् । द्युतानो वाजिभिर्यतः ॥

१८०४ ओ३म् पुनानो रूपे अव्यये विश्वा अर्षन्नभि श्रियः । शूरो न गोषु तिष्ठति ॥

१८०५ ओ३म् पुरः सद्य इत्थाधिये दिवोदासाय शम्बरम् । अध त्यं तुर्वशं यदुम् ॥

१८०६ ओ३म् पुरः सद्य इत्थाधिये दिवोदासाय शंबरम्। अध त्यं तुर्वशं यदुम्॥

१८०७ ओ३म् पुनानः कलशेष्वा वस्त्राण्यरुषो हरिः। परि गव्यान्यव्यत॥

१८०८ ओ३म् पुनानासश्चमूषदो गच्छन्तो वायुमश्विना। ते नो धत्त सुवीर्यम्॥

१८०९ ओ३म् पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः॥

१८१० ओ३म् पुनानो अक्रमीदभि विश्वा मृधो विचर्षणिः। शुम्भन्ति विप्रं धीतिभिः॥

१८११ ओ३म् पुनानो वरिवस्कृध्यूर्जं जनाय गिर्वणः। हरे सृजान आशिरम्॥

१८१२ ओ३म् पुनानो देववीतय इन्द्रस्य याहि निष्कृतम्। द्युतानो वाजिभिर्हितः॥

१८१३ ओ३म् प्र गायत्रेण गायत पवमानं विचर्षणिम् । इन्दुं सहस्रचक्षसम् ॥

१८१४ ओ३म् प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः । अच्छा वाजं सहस्रिणम् ॥

१८१५ ओ३म् प्र त्वा नमोभिरिन्दव इन्द्र सोमा असृक्षत । महे भराय कारिणः ॥

१८१६ ओ३म् प्र धारा अस्य शुष्मिणो वृथा पवित्रे अक्षरन् । पुनानो वाचमिष्यति ॥

१८१७ ओ३म् प्र निम्नेनेव सिन्धवो घ्नन्तो वृत्राणि भूर्णयः । सोमा असृग्रमाशवः ॥

१८१८ ओ३म् प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति । क्रत्वा सधस्थमासदत् ॥

१८१९ ओ३म् प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः । देवेभ्य उत्तमं हविः ॥

१८२० ओ३म् प्र युजो वाचो अग्रियो वृषाव चक्रदद्वने । सद्माभि सत्यो अध्वरः ॥

१८२१ ओ३म् प्र ये गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम् ॥

१८२२ ओ३म् प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि । जिन्वन्कोशं मधुश्चुतम् ॥

१८२३ ओ३म् प्र वाजमिन्दुरिष्यति सिषासन्वाजसा ऋषिः । व्रता विदान आयुधा ॥

१८२४ ओ३म् प्र शुक्रासो वयोजुवो हिन्वानासो न सप्तयः । श्रीणाना अप्सु मृञ्जत ॥

१८२५ ओ३म् प्र सोम मधुमत्तमो राये अर्ष पवित्र आ । मदो यो देववीतमः ॥

१८२६ ओ३म् प्र सोम याहि धारया सुत इन्द्राय मत्सरः । दधानो अक्षिति श्रवः ॥

१८२७ ओ३म् प्र सोमासो अधन्विषुः पवमानास इन्दवः । श्रीणाना अप्सु मृञ्जत ॥

१८२८ ओ३म् प्रवृण्वन्तो अभियुजः सुष्वये वरिवोविदः । स्वयं स्तोत्रे वयस्कृतः ॥

१८२९ ओ३म् प्रसवे त उदीरते तिस्रो वाचो मखस्युवः । यदव्य एषि सानवि ॥

१८३० ओ३म् प्रास्य धारा अक्षरन्वृष्णः सुतस्याजसः। देवा२ अनु प्रभूषतः॥

१८३१ ओ३म् प्रेष्ठं वो अतिथिं२ स्तुषे मित्रमिव प्रियम्। अग्ने रथं न वेद्यम्॥

१८३२ ओ३म् प्र न इन्दो महे तु न ऊर्मिं न बिभ्रदर्षसि। अभि देवा२ अयास्यः॥

१८३३ ओ३म् प्र पवमान धन्वसि सोमेन्द्राय मादनः। नृभिर्यतो वि नीयसे॥

१८३४ ओ३म् प्र सोमासो अधन्विषुः पवमानास इन्दवः। श्रीणाना अप्सु वृञ्जते॥

१८३५ ओ३म् प्र सोमासो मदच्युतः श्रवसे नो मघोना म् । सुता विदथे अक्र मुः॥

१८३६ ओ३म् प्र सोमासो मदच्युतः श्रवसे नो मघोनाम्। सुता विदथे अक्रमुः॥

१८३७ ओ३म् प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव॥

१८३८ ओ३म् प्र सोमासो विपश्चितोऽपो नयन्त ऊर्मयः। वनानि महिषा इव॥

१८३९ ओ३म् प्र कविर्देववीतयेऽव्या वारेभिरव्यत। साह्वान्विश्वा अभि स्पृधः॥

१८४० ओ३म् प्र ते धारा असश्चतो दिवो न यन्ति वृष्टयः। अच्छा वाज२ सहस्रिणम्॥

१८४१ ओ३म् प्र युजा वाचो अग्रियो वृषो अचिक्रदद्वने। सद्माभि सत्यो अध्वरः॥

१८४२ ओ३म् प्र स्वानासो रथा इवार्वन्तो न श्रवस्यवः। सोमासो राये अक्रमुः॥

१८४३ ओ३म् प्रप्र क्षयाय पन्यसे जनाय जुष्टो अद्रुहः। वीत्यर्ष पनिष्टये॥

१८४४ ओ३म् प्रसवे त उदीरते तिस्रो वाचो मखस्युवः। यदव्य एषि सानवि॥

१८४५ ओ३म् प्र धारा मधो अग्रियो महीरपो वि गाहते। हविर्हविःषु वन्द्यः॥

१८४६ ओ३म् प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः । घ्नन्तः कृष्णामप त्वचम्॥

१८४७ ओ३म् प्र यद्गावो न भूर्णयस्त्वेषा अयासो अक्रमुः। घ्नन्तः कृष्णामप त्वचम्॥

१८४८ ओ३म् प्र वाचमिन्दुरिष्यति समुद्रस्याधि विष्टपि। जिन्वन्कोशं मधुश्चुतम्॥

१८४९ ओ३म् परि द्युक्षꣳ सनद्रयिं भरद्वाजं नो अन्धसा। स्वानो अर्ष पवित्र आ॥

१८५० ओ३म् परि नः शर्मयन्त्या धारया सोम विश्वतः। सरा रसेव विष्टपम्॥

१८५१ ओ३म् परि नो अश्वमश्वविद्गोमदिन्दो हिरण्यवत्। क्षरा सहस्रिणीरिषः॥

१८५२ ओ३म् परि प्रिया दिवः कविर्वयाꣳसि नप्त्योर्हितः। स्वानैर्याति कविक्रतु॥

१८५३ ओ३म् परि प्रिया दिवः कविर्वयाꣳ सि नप्त्योर्हितः। स्वानैर्याति कविक्रतुः॥

१८५४ ओ३म् परि विश्वानि चेतसा मृज्यसे पवसे मती। स नः सोम श्रवो विदः॥

१८५५ ओ३म् परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया॥

१८५६ ओ३म् परि स्वानास इन्दवो मदाय बर्हणा गिरा। मधो अर्षन्ति धारया॥

१८५७ ओ३म् परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत्। मदेषु सर्वधा असि॥

१८५८ ओ३म् पवीतारः पुनीतन सोममिन्द्राय पातवे। अथा नो वस्यसस्कृधि॥

१८५९ ओ३म् पवन्ते वाजसातये सोमाः सहस्रपाजसः। गृणाना देववीतये॥

१८६० ओ३म् पवमान धिया हितोऽभि योनिं कनिक्रदत्। धर्मणा वायुमारुहः॥

१८६१ ओ३म् पवमान रुचारुचा देवो देवेभ्यः सुतः। विश्वा वसून्या विश॥

१८६२ ओ३म् पवमान सुवीर्यꣳ रयिꣳ सोम रिरीहि नः। इन्द्रविन्द्रेण नो युजा॥

१८६३ ओ३म् पवमानमवस्यवो विप्रमभि प्र गायत। सुष्वाणं देववीतये॥

१८६४ ओ३म् पवमानस्य ते कवे वाजिन्त्सर्गा असृक्षत । अर्वन्तो न श्रवस्यवः॥

१८६५ ओ३म् पवमानस्य ते वयं पवित्रमभ्युन्दतः। सखित्वमा वृणीमहे॥

१८६६ ओ३म् पवमानस्य ते रसो दक्षो वि राजति द्युमान्। ज्योतिर्विश्वꣳ स्वर्दृशे॥

१८६७ ओ३म् पवमानस्य विश्ववित्प्र ते सर्गा असृक्षत। सूर्यस्येव न रश्मयः॥

१८६८ ओ३म् पवमानस्य जिघ्नतो हरेश्चन्द्रा असृक्षत। जीरा अजिरशोचिषः॥

१८६९ ओ३म् पवमाना असृक्षत सोमाः शुक्रास इन्दवः। अभि विश्वानि काव्या॥

१८७० ओ३म् पवमाना दिवस्पर्यन्तरिक्षादसृक्षत। पृथिव्या अधि सानवि॥

१८७१ ओ३म् पवमानास आशवः शुभ्रा असृग्रमिन्दवः। घ्नन्तो विश्वा अप द्विषः॥

१८७२ ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्॥

१८७३ ओ३म् पवमानो अजीजनद्दिवश्चित्रं न तन्यतुम्। ज्योतिर्वैश्वानरं बृहत्॥

१८७४ ओ३म् पवमानो असिष्यदद्रक्षाꣳ स्यपजङ्घनत्। प्रत्नवद्रोचयन्रुचः॥

१८७५ ओ३म् पवमानो अभि स्पृधो विशो राजेव सीदति। यदीमृण्वन्ति वेधसः॥

१८७६ ओ३म् पवमान नि तोशसे रयिꣳ सोम श्रवाय्यम्। इन्दो समुद्रमा विश॥

१८७७ ओ३म् पवमान रसस्तव मदो राजन्नदुच्छुनः। वि वारमव्यमर्षति॥

१८७८ ओ३म् पवमान व्यश्नुहि रश्मिभिर्वाजसातमः। दधत्स्तोत्रे सुवीर्यम्॥

१८७९ ओ३म् पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥

१८८० ओ३म् पवस्व दक्षसाधनो देवेभ्यः पीतये हरे। मरुद्भ्यो वायवे मदः॥

१८८१ ओ३म् पवस्व देववीरति पवित्रꣳ सोम रꣳह्या। इन्द्रमिन्दो वृषा विश॥

१८८२ ओ३म् पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा॥

१८८३ ओ३म् पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः। वायुमा रोह धर्मणा॥

१८८४ ओ३म् पवस्व वाचो अग्रियः सोम चित्राभिरूतिभिः। अभि विश्वानि काव्या॥

१८८५ ओ३म् पवस्व विश्वचर्षण आ मही रोदसी पृण। उषाः सूर्यो न रश्मिभिः॥

१८८६ ओ३म् पवस्व वृत्रहन्तम उक्थेभिरनुमाद्यः। शुचिः पावको अद्भुतः॥

१८८७ ओ३म् पवस्व वृष्टिमा सु नोऽपामूर्मिं दिवस्परि। अयक्ष्मा बृहतीरिषः॥

१८८८ ओ३म् पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥

१८८९ ओ३म् पवस्वेन्दो वृषा सुतः कृधी नो यशसो जने। विश्वा अप द्विषो जहि॥

१८९० ओ३म् परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः। कारुं बिभ्रत्पुरुस्पृहम्॥

१८९१ ओ३म् परि यत्काव्या कविर्नृम्णा पुनानो अर्षति। स्वर्वाजी सिषासति॥

१८९२ ओ३म् परिष्कृण्वन्ननिष्कृतं जनाय यातयन्निषः। पृष्टिं दिवः परि स्रव॥

१८९३ ओ३म् पवमानो रथीतमः शुभ्रेभिः शुभ्रशस्तमः। हरिश्चन्द्रो मरुद्गणः॥

१८९४ ओ३म् बभ्रवे नु स्वतवसेऽरुणाय दिविस्पृशे। सोमाय गाथमर्चत॥

१८९५ ओ३म् मघोन आ पवस्व नो जहि विश्वा अप द्विषः । इन्दो सखायमा विश ॥

१८९६ ओ३म् मती जुष्टो धिया हितः सोमो हिन्वे परावति । विप्रस्य धारया कविः ॥

१८९७ ओ३म् मधोर्धारामनु क्षर तीव्रः सधस्थमासदः । चारुर्ऋताय पीतये ॥

१८९८ ओ३म् मर्मृजानास आयवो वृथा समुद्रमिन्दवः । अग्मन्नृतस्य योनिमा ॥

१८९९ ओ३म् महो नो राय आ भर पवमान जही मृधः । रास्वेन्दो वीरवद्यशः ॥

१९०० ओ३म् मिमाति वह्निरेतशः पदं युजान ऋक्वभिः । प्र यत्समुद्र आहितः ॥

१९०१ ओ३म् मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः । अनु विप्रा अमादिषुः ॥

१९०२ ओ३म् मृजन्ति त्वा दश क्षिपो हिन्वन्ति सप्त धीतयः। अनु विप्रा अमादिषुः॥

१९०३ ओ३म् मो षु ब्रह्मेव तन्द्रयुर्भवो वाजानां पते। मत्स्वा सुतस्य गोमतः॥

१९०४ ओ३म् मघोन आ पवस्व नो जहि विश्वा अप द्विषः। इन्दो सखायमा विश॥

१९०५ ओ३म् मदच्युत्क्षेति सादने सिन्धोरूर्मा विपश्चित्। सोमो गौरी अधि श्रितः॥

१९०६ ओ३म् मन्द्रया सोम धारया वृषा पवस्व देवयुः । अव्या वारेभिरस्मयुः॥

१९०७ ओ३म् महान्तं त्वा महीरन्वापो अर्षन्ति सिन्धवः। यद्गोभिर्वासयिष्यसे॥

१९०८ ओ३म् महो नो राय आ भर पवमान जही मृधः। रास्वेन्दो वीरवद्यशः॥

१९०९ ओ३म् य इमे रोदसी मही सं मातरेव दोहते । मदेषु सर्वधा असि ॥

१९१० ओ३म् यः सोमः कलशेष्वा अन्तः पवित्र आहितः। तमिन्दुः परि षस्वजे॥

१९११ ओ३म् यत्सोमो वाजमर्षति शतं धारा अपस्युवः । इन्द्रस्य सख्यमाविशन् ॥

१९१२ ओ३म् यदन्ति यच्च दूरके भयं विन्दति मामिह । पवमान वि तज्जहि ॥

१९१३ ओ३म् यमत्यमिव वाजिनं मृजन्ति योषणो दश । वने क्रीळन्तमत्यविम् ॥

१९१४ ओ३म् यवंयवं नो अन्धसा पुष्टम्पुष्टं परि स्रव । सोम विश्वा च सौभगा ॥

१९१५ ओ३म् यस्य ते द्युम्नवत्पयः पवमानाभृतं दिवः । तेन नो मृळ जीवसे ॥

१९१६ ओ३म् या ते भीमान्यायुधा तिग्मानि सन्ति धूर्वणे। रक्षा समस्य नो निदः॥

१९१७ ओ३म् यास्ते धारा मधुश्चुतोऽसृग्रमिन्द ऊतये। ताभिः पवित्रमासदः॥

१९१८ ओ३म् युवꣳ हि स्थः स्वःपती इन्द्रश्च सोम गोपती। ईशाना पिप्यतं धियः ॥

१९१९ ओ३म् ये सोमासः परावति ये अर्वावति सुन्विरे । ये वादः शर्यणावति ॥

१९२० ओ३म् ये ते पवित्रमूर्मयोऽभिक्षरन्ति धारया। तेभिर्नः सोम मृडय॥

१९२१ ओ३म् ये सोमासः परावति ये अर्वावति सुन्विरे। ये वादः शर्यणावति॥

१९२२ ओ३म् यो अत्य इव मृज्यते गोभिर्मदाय हर्यतः । तं गीर्भिर्वासयामसि ॥

१९२३ ओ३म् यो धारया पावकया परिप्रस्यन्दते सुतः। इन्दुरश्वो न कृत्व्यः॥

१९२४ ओ३म् यो जिनाति न जीयते हन्ति शत्रुमभीत्य। स पवस्व सहस्रजित्॥

१९२५ ओ३म् य आर्जीकेषु कृत्वसु ये मध्ये पस्त्यानाम्। ये वा जनेषु पञ्चसु॥

१९२६ ओ३म् यत्सोम चित्रमुक्थ्यं दिव्यं पार्थिवं वसु। तन्नः पुनान आ भर॥

१९२७ ओ३म् यवंयवं नो अन्धसा पुष्टंपुष्टं परि स्रव। विश्वा च सोम सौभगा॥

१९२८ ओ३म् यस्य ते सख्ये वयꣳ सासह्याम पृतन्यतः। तवेन्दो द्युम्न उत्तमे॥

१९२९ ओ३म् यदद्भिः परिषि(शि)च्यसे मर्मृज्यमान आयुभिः। द्रोणे सधस्थमश्नुषे॥

१९३० ओ३म् यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघश२ं सहा॥

१९३१ ओ३म् यस्ते मदो वरेण्यस्तेना पवस्वान्धसा। देवावीरघश२ं सहा॥

१९३२ ओ३म् रक्षा सु नो अररुषः स्वनात्समस्य कस्य चित् । निदो यत्र मुमुच्महे ॥

१९३३ ओ३म् रक्षोहा विश्वचर्षणिरभि योनिमयोहतम् । द्रुणा सधस्थमासदत् ॥

१९३४ ओ३म् रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर । अथा नो वस्यसस्कृधि ॥

१९३५ ओ३म् रसं ते मित्रो अर्यमा पिबन्ति वरुणः कवे । पवमानस्य मरुतः ॥

१९३६ ओ३म् राजा मेधाभिरीयते पवमानो मनावधि । अन्तरिक्षेण यातवे ॥

१९३७ ओ३म् राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते । यज्ञो न सप्त धातृभिः ॥

१९३८ ओ३म् राजा मेधाभिरीयते पवमानो मनावधि। अन्तरिक्षेण यातवे॥

१९३९ ओ३म् राजानो न प्रशस्तिभिः सोमासो गोभिरञ्जते। यज्ञोउ न सप्त धातृभिः॥

१९४० ओ३म् रायः समुद्रा२ं श्चतुरोऽस्मभ्य२ं सोम विश्वतः। आ पवस्व सहस्रिणः॥

१९४१ ओ३म् रसं ते मित्रो अर्यमा पिबन्तु वरुणः कवे। पवमानस्य मरुतः॥

१९४२ ओ३म् रक्षोहा विश्वचर्षणिरभि योनिमयोहते। द्रोणे सधस्थमासदत्॥

१९४३ ओ३म् रयिं नश्चित्रमश्विनमिन्दो विश्वायुमा भर। अथा नो वस्यसस्कृधि॥

१९४४ ओ३म् वावृधानाय तूर्वये पवन्ते वाजसातये । सोमाः सहस्रपाजसः ॥

१९४५ ओ३म् वाश्रा अर्षन्तीन्दवोऽभि वत्सं न मातरः। दधन्विरे गभस्त्योः॥

१९४६ ओ३म् विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः । तना कृण्वन्तो अर्वते ॥

१९४७ ओ३म् विश्वो यस्य व्रते जनो दाधार धर्मणस्पतेः । पुनानस्य प्रभूवसोः ॥

१९४८ ओ३म् विश्वस्मा इत्स्वर्दृशे साधारण२ रजस्तुरम्। गोपामृतस्य विर्भरत्॥

१९४९ ओ३म् विघ्नन्तो दुरिता पुरु सुगा तोकाय वाजिनः। त्मना कृण्वन्तो अर्वतः॥

१९५० ओ३म् वृषणं धीभिरप्तुरं सोममृतस्य धारया । मती विप्राः समस्वरन् ॥

१९५१ ओ३म् वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वा दधान ओजसा ॥

१९५२ ओ३म् वृषा पुनान आयुषु स्तनयन्नधि बर्हिषि । हरिः सन्योनिमासदत् ॥

१९५३ ओ३म् वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः । वृषा धर्माणि दधिषे ॥

१९५४ ओ३म् वृषाणं वृषभिर्यतं सुन्वन्ति सोममद्रिभिः । दुहन्ति शक्मना पयः ॥

१९५५ ओ३म् वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥

१९५६ ओ३म् वृषा पवस्व धारया मरुत्वते च मत्सरः। विश्वा दधान ओजसा॥

१९५७ ओ३म् वृषा पुनान आयू२ षि स्तनयन्नधि बर्हिषि। हरिः सन्योनिमासदः॥

१९५८ ओ३म् वृषा सोम द्युमा२ असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे॥

१९५९ ओ३म् वृषा सोम द्युमा२ असि वृषा देव वृषव्रतः। वृषा धर्माणि दध्रिषे॥

१९६० ओ३म् वृष्णस्ते वृष्ण्य२ शवो वृषा वनं वृषा सुतः। स त्वं वृषन्वृषेदसि॥

१९६१ ओ३म् वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम्॥

१९६२ ओ३म् वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे। पवमान स्वर्दृशम्॥

१९६३ ओ३म् वृष्टिं दिवः परि स्रव द्युम्नं पृथिव्या अधि। सहो नः सोम पृत्सु धाः॥

१९६४ ओ३म् वरिवोधातमो भुवो म२ हिष्ठो वृत्रहन्तमः। पर्षि राधो मघोनाम्॥

१९६५ ओ३म् शुभ्रमन्धो देववातमप्सु धूतो नृभिः सुतः । स्वदन्ति गावः पयोभिः ॥

१९६६ ओ३म् शुचिः पावक उच्यते सोमः सुतः स मधुमान्। देवावीरघश२ सहा॥

१९६७ ओ३म् शुभ्रमन्धो देववातमप्सु धौतं नृभिः सुतम्। स्वदन्ति गावः पयोभिः॥

१९६८ ओ३म् शुम्भमाना ऋतायुभिर्मृज्यमाना गभस्त्योः। पवन्ते वारे अव्यये॥

१९६९ ओ३म् शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः । चरन्ति विद्युतो दिवि ॥

१९७० ओ३म् शृण्वे वृष्टेरिव स्वनः पवमानस्य शुष्मिणः। चरन्ति विद्युतो दिवि॥

१९७१ ओ३म् स नः पवस्व वाजयुश्चक्राणश्चारुमध्वरम् । बर्हिष्माँ आ विवासति ॥

१९७२ ओ३म् स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः ॥

१९७३ ओ३म् स नो अद्य वसुत्तये क्रतुविद्गातुवित्तमः । वाजं जेषि श्रवो बृहत् ॥

१९७४ ओ३म् स नो अर्ष पवित्र आ मदो यो देववीतमः । इन्दविन्द्राय पीतये ॥

१९७५ ओ३म् स नो भगाय वायवे पूष्णे पवस्व मधुमान् । चारुर्मित्रे वरुणे च ॥

१९७६ ओ३म् स नो भगाय वायवे विप्रवीरः सदावृधः । सोमो देवेष्वा यमत् ॥

१९७७ ओ३म् स पवस्व धनंजय प्रयन्ता राधसो महः । अस्मभ्यं सोम गातुवित् ॥

१९७८ ओ३म् स पवस्व मदाय कं नृचक्षा देववीतये । इन्दविन्द्राय पीतये ॥

१९७९ ओ३म् स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः । इन्दविन्द्राय पीतये ॥

१९८० ओ३म् स पवस्व विचर्षण आ मही रोदसी पृण । उषाः सूर्यो न रश्मिभिः ॥

१९८१ ओ३म् स पवित्रे विचक्षणो हरिरर्षति धर्णसिः । अभि योनिं कनिक्रदत् ॥

१९८२ ओ३म् स मर्मृजान आयुभिः प्रयस्वान्प्रयसे हितः । इन्दुरत्यो विचक्षणः ॥

१९८३ ओ३म् स मर्मृजान आयुभिरिभो राजेव सुव्रतः । श्येनो न वंसु षीदति ॥

१९८४ ओ३म् स वह्निः सोम जागृविः पवस्व देववीरति । अभि कोशं मधुश्चुतम् ॥

१९८५ ओ३म् स वाजी रोचना दिवः पवमानो वि धावति । रक्षोहा वारमव्ययम् ॥

१९८६ ओ३म् स वायुमिन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मभिः ॥

१९८७ ओ३म् स सप्त धीतिभिर्हितो नद्यो अजिन्वदद्रुहः । या एकमक्षि वावृधुः ॥

१९८८ ओ३म् स सुतः पीतये वृषा सोमः पवित्रे अर्षति । विघ्नन्रक्षांसि देवयुः ॥

१९८९ ओ३म् स सुन्वे यो वसूनां यो रायामानेता य इळानाम् । सोमो यः सुक्षितीनाम् ॥

१९९० ओ३म् स सूनुर्मातरा शुचिर्जातो जाते अरोचयत् । महान्मही ऋतावृधा ॥

१९९१ ओ३म् स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति । पवमानः सहस्रिणम् ॥

१९९२ ओ३म् सं देवैः शोभते वृषा कविर्योनावधि प्रियः । वृत्रहा देववीतमः ॥

१९९३ ओ३म् संवृक्तधृष्णुमुक्थ्यं महामहिव्रतं मदम्। शतं पुरो रुरुक्षणिम्॥

१९९४ ओ३म् सं देवैः शोभते वृषा कविउयोनावधि प्रियः। पवमानो अदाभ्यः॥

१९९५ ओ३म् सना च सोम जेषि च पवमान महि श्रवः । अथा नो वस्यसस्कृधि ॥

१९९६ ओ३म् सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि ॥

१९९७ ओ३म् समी सखायो अस्वरन्वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ॥

१९९८ ओ३म् समीचीनास आसते होतारः सप्तजामयः । पदमेकस्य पिप्रतः ॥

१९९९ ओ३म् समु त्वा धीभिरस्वरन्हिन्वतीः सप्त जामयः । विप्रमाजा विवस्वतः ॥

२००० ओ३म् समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः । सोमः पवित्रे अस्मयुः ॥

२००१ ओ३म् समेनमह्रुता इमा गिरो अर्षन्ति सस्रुतः । धेनूर्वाश्रो अवीवशत् ॥

२००२ ओ३म् सम्मिश्लो अरुषो भव सूपस्थाभिर्न धेनुभिः । सीदञ्छ्येनो न योनिमा ॥

२००३ ओ३म् सहस्रोतिः शतामघो विमानो रजसः कविः । इन्द्राय पवते मदः ॥

२००४ ओ३म् सुत इन्द्राय विष्णवे सोमः कलशे अक्षरत् । मधुमाँ अस्तु वायवे ॥

२००५ ओ३म् सुत एति पवित्र आ त्विषिं दधान ओजसा । विचक्षाणो विरोचयन् ॥

२००६ ओ३म् सुनोता मधुमत्तमं सोममिन्द्राय वज्रिणे । चारुं शर्धाय मत्सरम् ॥

२००७ ओ३म् सुता इन्द्राय वायवे वरुणाय मरुद्भ्यः। सोमा अर्षन्तु विष्णवे॥

२००८ ओ३म् सुत एति पवित्र आ त्विषिं दधान ओजसा। विचक्षाणो विरोचयन्॥

२००९ ओ३म् सुवितस्य वनामहेऽति सेतुं दुराय्यम्। साह्याम दस्युमव्रतम्॥

२०१० ओ३म् सुषहा सोम तानि ते पुनानाय प्रभूवसो। वर्धा समुद्रमुक्थ्य॥

२०११ ओ३म् सोमः पुनानो अर्षति सहस्रधारो अत्यविः । वायोरिन्द्रस्य निष्कृतम् ॥

२०१२ ओ३म् सोमा असृग्रमिन्दवः सुता ऋतस्य सादने । इन्द्राय मधुमत्तमाः ॥

२०१३ ओ३म् सोमो अर्षति धर्णसिर्दधान इन्द्रियं रसम् । सुवीरो अभिशस्तिपाः ॥

२०१४ ओ३म् सोमः पुनानो अर्षति सहस्रधारो अत्यविः। वायोरिन्द्रस्य निष्कृतम्॥

२०१५ ओ३म् सोमा असृग्रमिन्दवः सुता ऋतस्य धारया। इन्द्राय मधुमत्तमाः॥

२०१६ ओ३म् सो अर्षेन्द्राय पीतये तिरो वाराण्यव्यया। सीदन्नृतस्य योनिमा॥

२०१७ ओ३म् स्वयं कविर्विधर्तरि विप्राय रत्नमिच्छति । यदी मर्मृज्यते धियः ॥

२०१८ ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥

२०१९ ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥

२०२० ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः॥

२०२१ ओ३म् स नः पवस्व शं गवे शं जनाय शमर्वते। श२ राजन्नोषधीभ्यः॥

२०२२ ओ३म् स नः पुनान आ भर रयिं वीरवतीमिषम् । ईशानः सोम विश्वतः॥

२०२३ ओ३म् स न ऊर्जे व्यक्ऽ.व्ययं पवित्रं धाव धारया। देवासः शृणवन् हि कम्॥

२०२४ ओ३म् स पवस्व मदिन्तम गोभिरञ्जानो अक्तुभिः। एन्द्रस्य जठरं विश॥

२०२५ ओ३म् स पवस्व य आविथेन्द्रं वृत्राय हन्तवे। वव्रिवा२ सं महीरपः॥

२०२६ ओ३म् स मर्मृजान आयुभिरिभो राजेव सुव्रतः। श्येनो न व२ सु षीदति॥

२०२७ ओ३म् स वृत्रहा वृषा सुतो वरिवोविददाभ्यः। सोमो वाजमिवासरत्॥

२०२८ ओ३म् स वह्निरप्सु दुष्टरो मृज्यमानो गभस्त्योः। सोमश्चमूषु सीदति॥

२०२९ ओ३म् स हि ष्मा जरितृभ्य आ वाजं गोमन्तमिन्वति। पवमानः सहस्रिणम्॥

२०३० ओ३म् सना च सोम जेषि च पवमान महि श्रवः। अथा नो वस्यसस्कृधि॥

२०३१ ओ३म् सप्तिं मृजन्ति वेधसो गृणन्तः कारवो गिरा। ज्योतिर्जज्ञानमुक्थ्यम्॥

२०३२ ओ३म् समिन्द्रेणोत वायुना सुत एति पवित्र आ। स२ सूर्यस्य रश्मिभिः॥

२०३३ ओ३म् सम्मिश्लो अरुषो भुवः सूपस्थाभिर्न धेनुभिः । सीदं च्छ्येनो न योनिमा॥

२०३४ ओ३म् स त्रितस्याधि सानवि पवमानो अरोचयत्। जामिभिःसूर्य२ सह॥

२०३५ ओ३म् स देवः कविनेषितोऽभि द्रोणानि धावति। इन्दुरिन्द्राय म२ हयन्॥

२०३६ ओ३म् स नो भगाय वायवे पूष्णे पवस्व मधुमान्। चारुर्मित्रे वरुणे च॥

२०३७ ओ३म् स नो विश्वा दिवो वसूतो पृथिव्या अधि। पुनान इन्दवा भर॥

२०३८ ओ३म् स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परि स्रव॥

२०३९ ओ३म् स न इन्द्राय यज्यवे वरुणाय मरुद्भ्यः। वरिवोवित्परिस्रव॥

२०४० ओ३म् स पवित्रे विचक्षणो हरिरर्षति धर्णसिः। अभि योनिं कनिक्रदत्॥

२०४१ ओ३म् स वाजी रोचनं दिवः पवमानो वि धावति। रक्षोहा वारमव्ययम्॥

२०४२ ओ३म् स वायुमिन्द्रमश्विना साकं मदेन गच्छति। रणा यो अस्य धर्मणा॥

२०४३ ओ३म् स सुतः पीतये वृषा सोमः पवित्रे अर्षति। विघ्नन्रक्षा२ सि देवयुः॥

२०४४ ओ३म् स सूनुर्मातरा शुचिर्जातो जाते अरोचयत्। महान्मही ऋतावृधा॥

२०४५ ओ३म् सना ज्योतिः सना स्वाऽविश्वा च सोम सौभगा। अथा नो वस्यसस्कृधि॥

२०४६ ओ३म् सना दक्षमुत क्रतुमप सोम मृधो जहि। अथा नो वस्यसस्कृधि॥

२०४७ ओ३म् समीचीना अनूषत हरि२ हिन्वन्त्यद्रिभिः। इन्दुमिन्द्राय पीतये॥

२०४८ ओ३म् समीचीनास आशत होतारः सप्तजानयः। पदमेकस्य पिप्रतः॥

२०४९ ओ३म् समुद्रो अप्सु मामृजे विष्टम्भो धरुणो दिवः। सोमः पवित्रे अस्मयुः॥

२०५० ओ३म् हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन । मधावा धावता मधु ॥

२०५१ ओ३म् हिन्वन्ति सूरमुस्रयः पवमानं मधुश्चुतम् । अभि गिरा समस्वरन् ॥

२०५२ ओ३म् हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम् । महामिन्दुं महीयुवः ॥

२०५३ ओ३म् हिन्वानासो रथा इव दधन्विरे गभस्त्योः। भरासः कारिणामिव॥

२०५४ ओ३म् हिन्वानो हेतृभिर्हित आ वाजं वाज्यक्रमीत्। सीदन्तो वनुषो यथा॥

२०५५ ओ३म् हिन्वन्ति सूरमुस्रयः स्वसारो जामयस्पतिम्। महामिन्दुं महीयुवः॥

२०५६ ओ३म् हस्तच्युतेभिरद्रिभिः सुतꣳ सोमं पुनीतन। मधावा धावता मधु॥

66. पूजा देवता

२०५७ ओ३म् पूषन्तव व्रते वयं न रिष्येम कदा चन। स्तोतारस्तऽइह स्मसि ॥

67. पूषा 34

२०५८ ओ३म् अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः ॥

२०५९ ओ३म् अदित्सन्तं चिदाघृणे पूषन्दानाय चोदय । पणेश्चिद्वि म्रदा मनः ॥

२०६० ओ३म् अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥

२०६१ ओ३म् अप त्यं परिपन्थिनं मुषीवाणं हुरश्चितम् । दूरमधि स्रुतेरज ॥

२०६२ ओ३म् अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः ॥

२०६३ ओ३म् आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे । येन पितृनचोदयः ॥

२०६४ ओ३म् आ पूषञ्चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं यथा पशुम् ॥

२०६५ ओ३म् आ रिख किकिरा कृणु पणीनां हृदया कवे । अथेमस्मभ्यं रन्धय ॥

२०६६ ओ३म् आजासः पूषणं रथे निशृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः ॥

२०६७ ओ३म् इमं च नो गवेषणं सातये सीषधो गणम् । आरात्पूषन्नसि श्रुतः ॥

२०६८ ओ३म् इयं ते पूषन्नाघृणे सुष्टुतिर्देव नव्यसी । अस्माभिस्तुभ्यं शस्यते ॥

२०६९ ओ३म् उत नो गोषणिं धियमश्वसां वाजसामुत । नृवत्कृणुहि वीतये ॥

२०७० ओ३म् उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ॥

२०७१ ओ३म् उत नो गोषणिं धियमश्वसां वाजसामुत। नृवत्कृणुह्यूतये॥

२०७२ ओ३म् एहि वां विमुचो नपादाघृणे सं सचावहै । रथीऋृतस्य नो भव ॥

२०७३ ओ३म् तां जुषस्व गिरं मम वाजयन्तीमवा धियम् । वधूयुरिव योषणाम् ॥

२०७४ ओ३म् न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥

२०७५ ओ३म् पूषन्तव व्रते वयं न रिष्येम कदा चन । स्तोतारस्त इह स्मसि ॥

२०७६ ओ३म् पूषन्ननु प्र गा इहि यजमानस्य सुन्वतः । अस्माकं स्तुवतामुत ॥

२०७७ ओ३म् पूषा राजानमाघृणिरपगूळ्हं गुहा हितम् । अविन्दच्चित्रबर्हिषम् ॥

२०७८ ओ३म् माकिर्नेशन्माकीं रिषन्माकीं सं शारि केवटे । अथारिष्टाभिरा गहि ॥

२०७९ ओ३म् मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ॥

२०८० ओ३म् य एनमादिदेशति करम्भादिति पूषणम् । न तेन देव आदिशे ॥

२०८१ ओ३म् यद॒द्य त्वा॑ पुरुष्टुत॒ ब्रवा॑म दस्र मन्तुमः । तत्सु नो॒ मन्म॑ साधय ॥

२०८२ ओ३म् यो अ॑स्मै ह॒विषावि॑ध॒न्न तं पू॒षापि॑ मृष्यते । प्र॒थ॒मो वि॑न्दते॒ वसु॑ ॥

२०८३ ओ३म् यो नः॑ पूषन्न॒घो वृको॑ दुः॒शेव॑ आ॒दिदे॑शति । अप॑ स्म॒ तं प॒थो ज॑हि ॥

२०८४ ओ३म् यो विश्वा॒भि वि॒पश्य॑ति॒ भुव॑ना॒ सं च॒ पश्य॑ति । स नः॑ पूषावि॒ता भु॑वत् ॥

२०८५ ओ३म् र॒थीत॑मं कप॒र्दि॒नमीशा॑नं॒ राध॑सो म॒हः । रा॒यः सखा॑यमीमहे ॥

२०८६ ओ३म् व॒यमु॑ त्वा पथस्पते॒ रथं॒ न वाज॑सातये । धि॒ये पू॑षन्नयुज्महि ॥

२०८७ ओ३म् वि प॒थो वाज॑सातये चिनु॒हि वि मृधो॑ जहि । साध॑न्तामुग्र नो॒ धिय॑: ॥

२०८८ ओ३म् वि पू॑ष॒न्नार॑या तुद प॒णेरि॑च्छ हृ॒दि प्रि॒यम् । अथे॑म॒स्मभ्यं॑ रन्धय ॥

२०८९ ओ३म् शृ॒ण्वन्तं॑ पू॒षणं॑ व॒यमिर्य॒मन॑ष्टवेदसम् । ईशा॑नं रा॒य ईमहे ॥

२०९० ओ३म् सं पू॑षन्वि॒दुषा॑ नय॒ यो अ॒ञ्जसा॑नु॒शास॑ति । य ए॒वेदमिति॒ ब्रव॑त् ॥

२०९१ ओ३म् समु॑ पू॒ष्णा गमे॑महि॒ यो गृ॒हाँ अ॑भि॒शास॑ति । इ॒म ए॒वेति॑ च॒ ब्रव॑त् ॥

68. पृथुश्रवसः कानीतस्य दानस्तुतिः 1

२०९२ ओ३म् दश॑ श्या॒वा ऋ॒धद्र॑यो वी॒तवा॑रास आ॒शव॑: । म॒थ्रा ने॒मिं नि वा॑वृतुः ॥

69. प्रस्कण्वस्य दानस्तुतिः 3

२०९३ ओ३म् दश॒ मह्यं॑ पौतक्र॒तः स॒हस्रा॒ दस्य॑वे॒ वृक॑: । नित्या॑द्रा॒यो अ॑मंहत ॥

२०९४ ओ३म् श॒तं श्वेता॑स उ॒क्षणो॑ दि॒वि तारो॒ न रो॑चन्ते । म॒ह्ना दि॒वं न त॑स्तभुः ॥

२०९५ ओ३म् सु॒दे॒वाः स्थ॑ काण्वायना॒ वयो॑वयो विच॒रन्त॑: । अश्वा॑सो॒ न च॑ङ्क्रमत ॥

70. फालमणिः, वनस्पतिः 3

२०९६ ओ३म् अरातीयोर्भ्रातृव्यस्य दुर्हार्दो द्विषतः शिरः। अपि वृश्चाम्योजसा ॥

२०९७ ओ३म् तं धाता प्रत्यमुञ्चत स भूतं व्य१कल्पयत्। तेन त्वं द्विषतो जहि ॥

२०९८ ओ३म् हिरण्यस्रगयं मणिः श्रद्धां यज्ञं महो दधत्। गृहे वसतु नोऽतिथिः ॥

71. बर्हिः 1

२०९९ ओ३म् स्तृणीत बर्हिरानुषग्घृतपृष्ठं मनीषिणः । यत्रामृतस्य चक्षणम् ॥

72. बृबुस्तक्षा 1

२१०० ओ३म् यस्य वायोरिव द्रवद्भद्रा रातिः सहस्रिणी । सद्यो दानाय मंहते ॥

73. बृहस्पतिर्देवता 1

२१०१ ओ३म् यो रेवान् योऽअमीवहा वसुवित् पुष्टिवर्द्धनः। स नः सिषक्तु यस्तुरः ॥

74. ब्रह्मगवी 3

२१०२ ओ३म् अघ्न्ये प्र शिरो जहि ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥

२१०३ ओ३म् एवा त्वं देव्यघ्न्ये ब्रह्मज्यस्य कृतागसो देवपीयोरराधसः ॥

२१०४ ओ३म् सा ब्रह्मज्यं देवपीयुं ब्रह्मगव्या१दीयमाना मृत्योः पड्वीष आ द्यति ॥

75. ब्रह्मणस्पतिः 2

२१०५ ओ३म् यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥

२१०६ ओ३म् सोमानां स्वरणं । कृणुहि ब्रह्मणस्पते। कक्षीवन्तँ य औशिजः॥

76. मन्त्रोक्ताः 1

२१०७ ओ३म् अपिं वृश्च पुराणवद्व्रततेंरिव गुष्पितम्। ओजों दास्यस्यं दम्भय ॥

77. मरुतः 8

२१०८ ओ३म् अस्ति सोमो अयꣳ सुतः पिबन्त्यस्य मरुतः। उत स्वराजो अश्विना॥

२१०९ ओ३म् आदह स्वधामनु पुनर्गर्भत्वमेरिरे। दधाना नाम यज्ञियम्॥

२११० ओ३म् उद्‌ त्ये सूनवो गिरः काष्ठा यज्ञेष्वत्नत। वाश्रा अभिज्ञु यातवे॥

२१११ ओ३म् उतो न्वस्य जोषमा इन्द्रः सुतस्य गोमतः। प्रातर्होतेव मत्सति॥

२११२ ओ३म् गौर्धयति मरुताꣳ श्रवस्युर्माता मघोनाम्।। युक्ता वह्नी रथानाम्॥

२११३ ओ३म् पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः। त्रिषधस्थस्य जावतः॥

२११४ ओ३म् प्रघासिनों हवामहे मरुतंश्च रिशादंसः। करम्भेणं सजोषंसः ॥

२११५ ओ३म् शशमानस्य वा नरः स्वेदस्य सत्यशवसः। विदा कामस्य वेनतः॥

78. मरूतः 58

२११६ ओ३म् अच्छां वदा तनां गिरा जरायै ब्रह्मंणस्पतिंम् । अग्निं मित्रं न दंर्शतम् ॥

२११७ ओ३म् अतं: परिज्मन्ना गंहि दिवो वां रोचनादधिं । समंस्मिन्नृञ्जते गिरं: ॥

२११८ ओ३म् अस्य वीरस्यं बर्हिषिं सुतः सोमो दिविंष्टिषु । उक्थं मदंश्च शस्यते ॥

२११९ ओ३म् आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसम् । इयर्ता मरुतो दिवः ॥

२१२० ओ३म् आ यात मरुतो दिव आन्तरिक्षादमादुत । माव स्थात परावतः ॥

२१२१ ओ३म् आ ये विश्वा पार्थिवानि पप्रथन्रोचना दिवः । मरुतः सोमपीतये ॥

२१२२ ओ३म् आरे सा वः सुदानवो मरुत ऋञ्जती शरुः । आरे अश्मा यमस्यथ ॥

२१२३ ओ३म् इमा उ वः सुदानवो घृतं न पिप्युषीरिषः । वर्धान्काण्वस्य मन्मभिः ॥

२१२४ ओ३म् इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः । इमं मे वनता हवम् ॥

२१२५ ओ३म् उदीरयन्त वायुभिर्वाश्रासः पृश्निमातरः । धुक्षन्त पिप्युषीमिषम् ॥

२१२६ ओ३म् उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते । वाश्रा अधि ष्णुना दिवः ॥

२१२७ ओ३म् उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः । उत्स्तोमैः पृश्निमातरः ॥

२१२८ ओ३म् कदत्विषन्त सूरयस्तिर आप इव स्रिधः । अर्षन्ति पूतदक्षसः ॥

२१२९ ओ३म् कदा गच्छाथ मरुत इत्था विप्रं हवमानम् । मार्डीकेभिर्नाधमानम् ॥

२१३० ओ३म् कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ॥

२१३१ ओ३म् कद्ध नूनं कधप्रियो यदिन्द्रमजहातन । को वः सखित्व ओहते ॥

२१३२ ओ३म् कस्मा अद्य सुजाताय रातहव्याय प्र ययुः । एना यामेन मरुतः ॥

२१३३ ओ३म् के ष्ठा नरः श्रेष्ठतमा य एकएक आयय । परमस्याः परावतः ॥

२१३४ ओ३म् को वेद नूनमेषां यत्रा मदन्ति धूतयः । ऋतजाता अरेपसः ॥

२१३५ ओ३म् को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः । यत्सीमन्तं न धूनुथ ॥

२१३६ ओ३म् क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभि प्र गायत ॥

२१३७ ओ३म् क्व१ वोऽश्वाः क्वा३भीशवः कथं शेक कथा यय । पृष्ठे सदो नसोर्यमः ॥

२१३८ ओ३म् गिरयश्चिन्नि जिहते पर्शानासो मन्यमानाः । पर्वताश्चिन्नि येमिरे ॥

२१३९ ओ३म् गृहमेधास आ गत मरुतो माप भूतन । युष्माकोती सुदानवः ॥

२१४० ओ३म् जघने चोद एषां वि सक्थानि नरो यमुः । पुत्रकृथे न जनयः ॥

२१४१ ओ३म् तत्सु नो विश्वे अर्य आ सदा गृणन्ति कारवः । मरुतः सोमपीतये ॥

२१४२ ओ३म् तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥

२१४३ ओ३म् ते नो वसूनि काम्या पुरुश्चन्द्रा रिशादसः । आ यज्ञियासो ववृत्तन ॥

२१४४ ओ३म् त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु । उत्सं कवन्धमुद्रिणम् ॥

२१४५ ओ३म् देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः । महामनूषत श्रुतम् ॥

२१४६ ओ३म् नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः । शर्धाँ ऋतस्य जिन्वथ ॥

२१४७ ओ३म् नि यद्यामाय वो गिरिर्नि सिन्धवो विधर्मणे । महे शुष्माय येमिरे ॥

२१४८ ओ३म् नि वो यामाय मानुषो दध्र उग्राय मन्यवे । जिहीत पर्वतो गिरिः ॥

२१४९ ओ३म् परा वीरास एतन मर्यासो भद्रजानयः । अग्नितपो यथासथ ॥

२१५० ओ३म् पिबन्ति मित्रो अर्यमा तना पूतस्य वरुणः । त्रिषधस्थस्य जावतः ॥

२१५१ ओ३म् प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत् । वि पर्वतेषु राजथ ॥

२१५२ ओ३म् प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे । देवत्तं ब्रह्म गायत ॥

२१५३ ओ३म् मरुतो यद्ध वो दिवः सुम्नायन्तो हवामहे । आ तू न उप गन्तन ॥

२१५४ ओ३म् मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरीँरचुच्यवीतन ॥

२१५५ ओ३म् मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥

२१५६ ओ३म् मरुतो वीळुपाणिभिश्चित्रा रोधस्वतीरनु । यातेमखिद्रयामभिः ॥

२१५७ ओ३म् य ईं वहन्त आशुभिः पिबन्तो मदिरं मधु । अत्र श्रवांसि दधिरे ॥

२१५८ ओ३म् यदेषां पृषती रथे प्रष्टिर्वहति रोहितः । यान्ति शुभ्रा रिणन्नपः ॥

२१५९ ओ३म् युवा स मारुतो गणस्त्वेषरथो अनेद्यः । शुभंयावाप्रतिष्कुतः ॥

२१६० ओ३म् यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥

२१६१ ओ३म् यूयं मर्तं विपन्यवः प्रणेतार इत्था धिया । श्रोतारो यामहूतिषु ॥

२१६२ ओ३म् यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे । उत प्रचेतसो मदे ॥

२१६३ ओ३म् ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः । अजायन्त स्वभानवः ॥

२१६४ ओ३म् येनाव तुर्वशं यदुं येन कण्वं धनस्पृतम् । राये सु तस्य धीमहि ॥

२१६५ ओ३म् येषां श्रियाधि रोदसी विभ्राजन्ते रथेष्वा । दिवि रुक्म इवोपरि ॥

२१६६ ओ३म् येषामज्मेषु पृथिवी जुजुर्वाँ इव विश्पतिः । भिया यामेषु रेजते ॥

२१६७ ओ३म् वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम् । अस्मे वृद्धा असन्निह ॥

२१६८ ओ३म् वपन्ति मरुतो मिहं प्र वेपयन्ति पर्वतान् । यद्यामं यान्ति वायुभिः ॥

२१६९ ओ३म् वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति । यदेषां वृष्टिरसर्जि ॥

२१७० ओ३म् शशमानस्यं वा नरः स्वेदंस्य सत्यशवसः । विदा कामंस्य वेनंतः ॥

२१७१ ओ३म् सहो षु णो वज्रंहस्तैः कण्वांसो अग्निं मरुद्भिः । स्तुषे हिरंण्यवाशीभिः ॥

२१७२ ओ३म् सांतपना इदं हविर्मरुतस्तज्जुजुष्टन । युष्माकोती रिंशादसः ॥

२१७३ ओ३म् सृजन्तिं रश्मिमोजंसा पन्थां सूर्याय यातंवे । ते भानुभिर्वि तंस्थिरे ॥

79. मरूत इन्द्रश्च 2

२१७४ ओ३म् इन्द्रेंण सं हि दृक्षंसे संजग्मानो अबिंभ्युषा । मन्दू संमानवंर्चसा ॥

२१७५ ओ३म् वीळु चिंदारुजत्नुभिर्गुहां चिदिन्द्र वह्निंभिः । अविंन्द उस्रिया अनुं ॥

80. मरुद्गणः 7

२१७६ ओ३म् अतंः परिज्मन्ना गंहि दिवो वां रोचनादधिं। समंस्मिन्नृञ्जते गिरंः ॥

२१७७ ओ३म् अंनवद्यैरभिद्युंभिर्मखः सहंस्वदर्चति। गणैरिन्द्रंस्य काम्यैः ॥

२१७८ ओ३म् आदहं स्वधामनु पुनंर्गर्भत्वमेंरिरे। दधांना नामं यज्ञियंम् ॥

२१७९ ओ३म् आदहं स्वधामनु पुनंर्गर्भत्वमेंरिरे। दधांना नामं यज्ञियंम् ॥

२१८० ओ३म् इन्द्रेंण सं हि दृक्षंसे संजग्मानो अबिंभ्युषा। मन्दू संमानवंर्चसा ॥

२१८१ ओ३म् मरुंतो यस्य हि क्षये पाथा दिवो विंमहसः। स सुंगोपातंमो जनंः ॥

२१८२ ओ३म् यूयं नंः प्रवतो नपान्मरुंतः सूर्यंत्वचसः। शर्मं यच्छाथ सप्रथंः ॥

81. मित्रः 2

२१८३ ओ३म् अभि यो महिना दिवं मित्रो बभूव सप्रथाः । अभि श्रवोभिः पृथिवीम् ॥

२१८४ ओ३म् मित्राय पञ्च येमिरे जना अभिष्टिशवसे । स देवान्विश्वान्बिभर्ति ॥

82. मित्रावरुणौ 45

२१८५ ओ३म् अयं वां मित्रावरुणा सुतः सोम ऋतावृधा । ममेदिह श्रुतं हवम् ॥

२१८६ ओ३म् अयं वां मित्रावरुणा सुतः सोम ऋतावृधा। ममेदिह श्रुतꣳ हवम्॥

२१८७ ओ३म् आ नो गन्तं रिशादसा वरुण मित्र बर्हणा । उपेमं चारुमध्वरम् ॥

२१८८ ओ३म् आ नो मित्रावरुणा घृतैर्गव्यूतिमुक्षतम्। मध्वा रजाꣳसि सुक्रतू॥

२१८९ ओ३म् उप नः सुतमा गतं वरुण मित्र दाशुषः । अस्य सोमस्य पीतये ॥

२१९० ओ३म् उरुशंसा नमोवृधा मह्ना दक्षस्य राजथः । द्राघिष्ठाभिः शुचिव्रता ॥

२१९१ ओ३म् उरुशꣳसा नमोवृधा मह्ना दक्षस्य राजथः। द्राघिष्ठाभिः शुचिव्रता॥

२१९२ ओ३म् ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥

२१९३ ओ३म् ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥

२१९४ ओ३म् ऋतेन मित्रावरुणावृतावृधावृतस्पृशा। क्रतुं बृहन्तमाशाथे॥

२१९५ ओ३म् ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती। ता मित्रावरुणा हुवे॥

२१९६ ओ३म् ऋतमृतेन सपन्तेषिरं दक्षमाशाते। अद्रुहा देवौ वर्धेते॥

२१९७ ओ३म् कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥

२१९८ ओ३म् कवी नो मित्रावरुणा तुविजाता उरुक्षया। दक्षं दधाते अपसम्॥

२१९९ ओ३म् गावऽउपावतावतं मही यज्ञस्य रप्सुदा। उभा कर्णा हिरण्यया ॥

२२०० ओ३म् गृणाना जमदग्निना योनावृतस्य सीदतम् । पातं सोममृतावृधा ॥

२२०१ ओ३म् गृणाना जमदग्निना योनावृतस्य सीदतम्। पात२ सोममृतावृधा॥

२२०२ ओ३म् ता वां सम्यगद्रुह्वाणेषमश्याम धायसे । वयं ते रुद्रा स्याम ॥

२२०३ ओ३म् ता सम्राजा घृतासुती आदित्या दानुनस्पती । सचेते अनवह्वरम् ॥

२२०४ ओ३म् ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वा क्षत्रं देवेषु॥

२२०५ ओ३म् ता नः शक्तं पार्थिवस्य महो रायो दिव्यस्य। महि वां क्षत्रं देवेषु॥

२२०६ ओ३म् ता वा२ सम्यगद्रुह्वाणेषमश्याम धाम च। वयं वां मित्रा स्याम॥

२२०७ ओ३म् ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम्॥

२२०८ ओ३म् पातं नो रुद्रा पायुभिरुत त्रायेथां सुत्रात्रा । तुर्याम दस्यून्तनूभिः ॥

२२०९ ओ३म् पातं नो मित्रा पायुभिरुत त्रायेथा२ सुत्रात्रा साह्याम दस्यूं तनूभिः॥

२२१० ओ३म् पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण । मित्र वंसि वां सुमतिम् ॥

२२११ ओ३म् पुरूरुणा चिद्ध्यस्त्यवो नूनं वां वरुण। मित्र व२ सि वा२ सुमतिम्॥

२२१२ ओ३म् प्र यो वां मित्रावरुणाजिरो दूतो अद्रवत् । अयःशीर्षा मदेरघुः ॥

२२१३ ओ३म् प्र वो मित्राय गायत वरुणाय विपा गिरा । महिक्षत्रावृतं बृहत् ॥

२२१४ ओ३म् प्र वो मित्राय गायत वरुणाय विपा गिरा। महिक्षत्रावृतं बृहत्॥

२२१५ ओ३म् मा कस्याद्भुतक्रतू यक्षं भुंजेमा तनूभिः । मा शेषसा मा तनसा ॥

२२१६ ओ३म् मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीꣳ साधन्ता ॥

२२१७ ओ३म् मित्रं वयं हवामहे वरुणं सोमपीतये । जज्ञाना पूतदक्षसा ॥

२२१८ ओ३म् मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ॥

२२१९ ओ३म् मित्रं वयꣳ हवामहे वरुणꣳ सोमपीतये। या जाता पूतदक्षसा॥

२२२० ओ३म् मित्रꣳ हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीꣳ साधन्ता॥

२२२१ ओ३म् यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति । यथा विश्वे सजोषसः ॥

२२२२ ओ३म् युवं दक्षं धृतव्रत मित्रावरुण दूळभम् । ऋतुना यज्ञमाशाथे ॥

२२२३ ओ३म् राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आशाते॥

२२२४ ओ३म् वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥

२२२५ ओ३म् विश्वस्य हि प्रचेतसा वरुण मित्र राजथः । ईशाना पिप्यतं धियः ॥

२२२६ ओ३म् वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्तमाशाते॥

२२२७ ओ३म् वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः॥

२२२८ ओ३म् सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च । देवा देवेषु प्रशस्ता ॥

२२२९ ओ३म् सम्राजा या घृतयोनी मित्रश्चोभा वरुणश्च। देवा देवेषु प्रशस्ता॥

83. रथवीतिर्दाल्भ्यः 3

२२३० ओ३म् उत मे वोचतादिति सुतसोमे रथवीतौ । न कामो अप वेति मे ॥

२२३१ ओ३म् एतं मे स्तोमम्मूर्म्ये दार्भ्याय परा वह । गिरो देवि रथीरिव ॥

२२३२ ओ३म् एष क्षेति रथवीतिर्मघवा गोमतीरनु । पर्वतेष्वपश्रितः ॥

84. रात्रिस्तवः 3

२२३३ ओ३म् उप ते गा इवाकरं वृणीष्व दुहितर्दिवः । रात्रि स्तोमं न जिग्युषे ॥

२२३४ ओ३म् नि ग्रामासो अविक्षत नि पद्वन्तो नि पक्षिणः । नि श्येनासश्चिदर्थिनः ॥

२२३५ ओ३म् सा नो अद्य यस्या वयं नि ते यामन्नविक्ष्महि । वृक्षे न वसतिं वयः ॥

85. रुद्रः 3

२२३६ ओ३म् कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥

२२३७ ओ३म् गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छंयोः सुम्नमीमहे ॥

२२३८ ओ३म् यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥

86. रुद्रः, व्याघ्रः 1

२२३९ ओ३म् अक्ष्यौ च ते मुखं च ते व्याघ्र जम्भयामसि। आत्सर्वान्विंशतिं नखान् ॥

87. वरुणः 13

२२४० ओ३म् इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युरा चके॥

२२४१ ओ३म् उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥

२२४२ ओ३म् कदा क्षत्रश्रियं नरमा वरुणं करामहे । मृळीकायोरुचक्षसम् ॥

२२४३ ओ३म् तदित्समानमाशाते वेनन्ता न प्र युच्छतः । धृतव्रताय दाशुषे ॥

२२४४ ओ३म् दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः ॥

२२४५ ओ३म् परा मे यन्ति धीतयो गावो न गव्यूतीरनु । इच्छन्तीरुरुचक्षसम् ॥

२२४६ ओ३म् परा हि मे विमन्यवः पतन्ति वस्यइष्टये । वयो न वसतीरुप ॥

२२४७ ओ३म् बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम् । परि स्पशो नि षेदिरे ॥

२२४८ ओ३म् मा नो वधाय हत्नवे जिहीळानस्य रीरधः । मा हृणानस्य मन्यवे ॥

२२४९ ओ३म् यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम् । मिनीमसि द्यविद्यवि ॥

२२५० ओ३म् वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः। करतां नः सुराधसः ॥

२२५१ ओ३म् वि मृळीकाय ते मनो रथीरश्वं न संदितम् । गीर्भिर्वरुण सीमहि ॥

२२५२ ओ३म् स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् । प्र ण आयूंषि तारिषत् ॥

88. वरुणमित्रार्यमणः 2

२२५३ ओ३म् मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम् । सुम्नैरिद्व आ विवासे ॥

२२५४ ओ३म् यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा । नू चित्स दभ्यते जनः ॥

89. वाजी देवता 1

२२५५ ओ३म् युञ्जाथाꣳ रासभं युवमस्मिन् यामे वृषण्वसू। अग्निं भरन्तमस्मयुम् ॥

90. वायुः 11

२२५६ ओ३म् उत वात पितासि न उत भ्रातोत नः सखा । स नो जीवातवे कृधि ॥

२२५७ ओ३म् उत वात पितासि न उत भ्रातोत नः सखा। स नो जीवातवे कृधि॥

२२५८ ओ३म् नियुत्वान्वायवा गह्ययꣳ शुक्रो अयामि ते। गन्तासि सुन्वतो गृहम्॥

२२५९ ओ३म् यददो वात ते गृहे३ऽमृतं निहितं गुहा। तस्य नो धेहि जीवसे॥

२२६० ओ३म् वात आ वातु भेषजं शम्भु मयोभु नो हृदे । प्र ण आयूंषि तारिषत् ॥

२२६१ ओ३म् वायुरग्रेगा यज्ञप्रीः साकं गन्मनसा यज्ञम्। शिवो नियुद्भिः शिवाभिः ॥

२२६२ ओ३म् वायो तव प्रपृञ्चती धेना जिगाति दाशुषे । उरूची सोमपीतये ॥

२२६३ ओ३म् वायो ये ते सहस्रिणो रथासस्तेभिरा गहि । नियुत्वान्त्सोमपीतये ॥

२२६४ ओ३म् वायो ये ते सहस्रिणो रथासस्तेभिरा गहि। नियुत्वान्त्सोमपीतये ॥

२२६५ ओ३म् वात आ वातु बेषजꣳ शम्भु मयोभु नो हृदे। प्र न आयूꣳषि तारिषत्॥

२२६६ ओ३म् स त्वं नो देव मनसा वायो मन्दानो अग्रियः । कृधि वाजाँ अपो धियः ॥

91. विद्वांसो देवता 1

२२६७ ओ३म् केतुं कृण्वन्नकेतवे पेशो मर्याऽअपेशसे। समुषद्भिरजायथाः ॥

92. विद्वान् देवता 2

२२६८ ओ३म् अग्ने पत्नीरिहा वह देवानामुशतीरुप। त्वष्टारꣳ सोमपीतये ॥

२२६९ ओ३म् अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिबऽऋतुना। त्वꣳहि रत्नधा ऽअसि ॥

93. विश्वे देवाः 37

२२७० ओ३म् अग्ने सुतस्य पीतये विश्वैरूमेभिरा गहि । देवेभिर्हव्यदातये ॥

२२७१ ओ३म् अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि । पितुष्टे अस्मि वन्दिता ॥

२२७२ ओ३म् आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आ गहि ॥

२२७३ ओ३म् आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥

२२७४ ओ३म् इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥

२२७५ ओ३म् इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान्मारुतं गणम् ॥

२२७६ ओ३म् ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥

२२७७ ओ३म् उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये। सुमृडीका भवन्तु नः॥

२२७८ ओ३म् ऐभिरग्ने दुवो गिरो विश्वेभिः सोमपीतये । देवेभिर्याहि यक्षि च ॥

२२७९ ओ३म् ओमासश्चर्षणीधृतो विश्वे देवास आ गत । दाश्वांसो दाशुषः सुतम् ॥

२२८० ओ३म् कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥

२२८१ ओ३म् घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥

२२८२ ओ३म् जयतामिव तन्यतुर्मरुतामेति धृष्णुया । यच्छुभं याथना नरः ॥

२२८३ ओ३म् तत्सु नः सविता भगो वरुणो मित्रो अर्यमा । इन्द्रो नो राधसा गमत् ॥

२२८४ ओ३म् ते नः सन्तु युजः सदा वरुणो मित्रो अर्यमा । वृधासश्च प्रचेतसः ॥

२२८५ ओ३म् ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः । व्रता रक्षन्ते विश्वाहा ॥

२२८६ ओ३म् देवानामिदवो महत्तदा वृणीमहे वयम् । वृष्णामस्मभ्यमूतये ॥

२२८७ ओ३म् न देवानामति व्रतं शतात्मा चन जीवति । तथा युजा वि वावृते ॥

२२८८ ओ३म् प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥

२२८९ ओ३म् मधु नक्तमुतोषसो मधुमत् पार्थिवऽ रजः। मधु द्यौरस्तु नः पिता ॥

२२९० ओ३म् मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥

२२९१ ओ३म् मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः । मान्त स्थुर्नो अरातयः ॥

२२९२ ओ३म् यस्य प्रस्वादसो गिर उपमश्रवसः पितुः । क्षेत्रं न रण्वमूचुषे ॥

२२९३ ओ३म् यस्य मा हरितो रथे तिस्रो वहन्ति साधुया । स्तवै सहस्रदक्षिणे ॥

२२९४ ओ३म् यूयं हि ष्ठा सुदानव इन्द्रज्येष्ठा अभिद्यवः । अधा चिद्व उत ब्रुवे ॥

२२९५ ओ३म् ये त्रिंशति त्रयस्परो देवासो बर्हिरासदन् । विदन्नह द्वितासनन् ॥

२२९६ ओ३म् येन देवा असुराणामोजांस्यवृणीध्वम्। तेना नः शर्म यच्छत ॥

२२९७ ओ३म् यो वो देवा घृतस्नुना हव्येन प्रतिभूषति । तं विश्व उप गच्छथ ॥

२२९८ ओ३म् वयमिद्वः सुदानवः क्षियन्तो यान्तो अध्वन्ना । देवा वृधाय हूमहे ॥

२२९९ ओ३म् वरुणो मित्रो अर्यमा स्मद्रातिषाचो अग्नयः । पत्नीवन्तो वषट्कृताः ॥

२३०० ओ३म् वामस्य हि प्रचेतस ईशानाशो रिशादसः । नेमादित्या अघस्य यत् ॥

२३०१ ओ३म् विश्वान्देवान्हवामहे मरुतः सोमपीतये । उग्रा हि पृश्निमातरः ॥

२३०२ ओ३म् विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥

२३०३ ओ३म् विश्वे देवास आ गत शृणुता म इमं हवम् । एदं बर्हिर्नि षीदत ॥

२३०४ ओ३म् विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः । उस्रा इव स्वसराणि ॥

२३०५ ओ३म् विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥

२३०६ ओ३म् स्तोत्रमिन्द्रो मरुद्गणस्त्वष्टमान्मित्रो अर्यमा । इमा हव्या जुषन्त नः ॥

94. विश्वे देवा ऋत्विजो वा 2

२३०७ ओ३म् इष्कृताहावमवतं सुवरत्रं सुषेचनम् । उद्रिणं सिञ्चे अक्षितम् ॥

२३०८ ओ३म् सीरा युञ्जन्ति कवयो युगा वि तन्वते पृथक् । धीरा देवेषु सुम्नया ॥

95. विष्णुः 15

२३०९ ओ३म् अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त धामभिः ॥

२३१० ओ३म् इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदा। समूढमस्य पांसुरे ॥

२३११ ओ३म् इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पा२ सुले॥

२३१२ ओ३म् इदं विष्णुर्व चक्रमे त्रेधा नि दधे पदम्। समूढमस्य पा२ सुले॥

२३१३ ओ३म् तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥

२३१४ ओ३म् तद्विप्रासो विपन्यवो जागृवाꣳसः समिन्धते। विष्णोर्यत्परमं पदम् ॥

२३१५ ओ३म् तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥

२३१६ ओ३म् तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीऽव चक्षुराततम् ॥

२३१७ ओ३म् त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। इतो धर्माणि धारयन् ॥

२३१८ ओ३म् त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्॥

२३१९ ओ३म् तद्विप्रासो विपन्युवो जागृवा२ सः समिन्धते। विष्णोर्यत्परमं पदम्॥

२३२० ओ३म् तद्विष्णोः परमं पद२ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥

२३२१ ओ३म् विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा ॥

२३२२ ओ३म् विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्यः सखा॥

96. वैश्वानरः 3

२३२३ ओ३म् वैश्वानरो न आगमदिमं यज्ञं सजूरुप। अग्निरुक्थेष्वंहसु ॥

२३२४ ओ३म् वैश्वानरो न ऊतय आ प्र यातु परावतः। अग्निर्नः सुष्टुतीरुप ॥

२३२५ ओ३म् वैश्वानरोऽङ्गिरसां स्तोममुक्थं च चाक्लृपत्। एषु द्युम्नं स्वऽर्यमत् ॥

97. शशीयशी 3

२३२६ ओ३म् उत घा नेमो अस्तुतः पुमाँ इति ब्रुवे पणिः । स वैरदेय इत्समः ॥

२३२७ ओ३म् उत त्वा स्त्री शशीयसी पुंसो भवति वस्यसी । अदेवत्रादराधसः ॥

२३२८ ओ३म् वि या जानाति जसुरिं वि तृष्यन्तं वि कामिनम् । देवत्रा कृणुते मनः ॥

98. संस्फानम् 2

२३२९ ओ३म् अयं नो नभसस्पतिः संस्फानो अभि रक्षतु। असमातिं गृहेषु नः ॥

२३३० ओ३म् त्वं नो नभसस्पत ऊर्जं गृहेषु धारय। आ पुष्टमेत्वा वसु ॥

99. सदसस्पतिः 1

२३३१ ओ३म् यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ॥

100. सदसस्पतिर्नराशंसो वा 1

२३३२ ओ३म् नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् । दिवो न सद्ममखसम् ॥

101. सरस्वती 8

२३३३ ओ३म् उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः । वृत्रघ्नी वष्टि सुष्टुतिम् ॥

२३३४ ओ३म् उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा। सरस्वती स्तोम्या भूत्॥

२३३५ ओ३म् पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥

२३३६ ओ३म् पावका नः सरस्वती वाजेभिर्वाजिनीवती। यज्ञं वष्टु धियावसुः ॥

२३३७ ओ३म् महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥

२३३८ ओ३म् महोऽअर्णः सरस्वती प्र चेतयति केतुना। धियो विश्वा वि राजति ॥

२३३९ ओ३म् यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः । अमश्चरति रोरुवत् ॥

२३४० ओ३म् शिवा नः शंतमा भव सुमृडीका सरस्वति। मा ते युयोम संदृशः ॥

102. सरस्वान् 1

२३४१ ओ३म् जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः। सरस्वन्तं हवामहे॥

103. सविता 17

२३४२ ओ३म् अनागसो अदितये देवस्य सवितुः सवे । विश्वा वामानि धीमहि ॥

२३४३ ओ३म् आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ॥

२३४४ ओ३म् उभाभ्यां देव सवितः पवित्रेण सवेन च। अस्मान्पुनीहि चक्षसे ॥

२३४५ ओ३म् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ॥

२३४६ ओ३म् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥

२३४७ ओ३म् देवं नरः सवितारं विप्रा यज्ञैः सुवृक्तिभिः । नमस्यन्ति धियेषिताः ॥

२३४८ ओ३म् देवस्य चेततो महीं प्र सवितुर्हवामहे। सुमतिऽ सत्यराधसम् ॥

२३४९ ओ३म् विभक्तारऽ हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम् ॥

२३५० ओ३म् विभक्तारं हवामहे वसोश्चित्रस्य राधसः । सवितारं नृचक्षसम् ॥

२३५१ ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव । यद्भद्रं तन्न आ सुव ॥

२३५२ ओ३म् विश्वानि देव सवितर्दुरितानि परा सुव। यद्भद्रं तन्नऽआ सुव ॥

२३५३ ओ३म् स हि रत्नानि दाशुषे सुवाति सविता भगः । तं भागं चित्रमीमहे ॥

२३५४ ओ३म् सखाय आ नि षीदत सविता स्तोम्यो नु नः । दाता राधांसि शुम्भति ॥

२३५५ ओ३म् सविता ते शरीरेभ्यः पृथिव्यां लोकमिच्छतु। तस्मै युज्यन्तामुस्रियाः ॥

२३५६ ओ३म् सुष्टुतिऽ सुमतीवृधो रातिऽ सवितुरीमहे। प्र देवाय मतीविदे ॥

२३५७ ओ३म् हिरण्यपाणिमूतये सवितारमुप ह्वये । स चेत्ता देवता पदम् ॥

२३५८ ओ३म् हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदम् ॥

104. सविता भगो वा 3

२३५९ ओ३म् अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन्भागमीमहे ॥

२३६० ओ३म् भगंभक्तस्य ते वयमुदंशेम तवावसा । मूर्धानं राय आरभे ॥

२३६१ ओ३म् यश्चिद्धि तं इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ॥

105. सार्पराज्ञी सूर्यो वा 1

२३६२ ओ३म् त्रिंशद्धाम वि राजति वाक्पतंगाय धीयते । प्रति वस्तोरह द्युभिः ॥

106. सावर्णेर्दानस्तुतिः 1

२३६३ ओ३म् उत दासा परिविषे स्मद्दिष्टी गोपरीणसा । यदुस्तुर्वश्च मामहे ॥

107. सूर्यः 22

२३६४ ओ३म् अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा ॥

२३६५ ओ३म् अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥

२३६६ ओ३म् अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे ॥

२३६७ ओ३म् अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यऽः। ताभिर्याति स्वयुक्तिभिः ॥

२३६८ ओ३म् अदृश्रन्नस्य केतवो वि रश्मयो जना२ अनु। भ्रा जन्तो अग्नयो यथा॥

२३६९ ओ३म् अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः॥

२३७० ओ३म् अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे॥

२३७१ ओ३म् अन्तश्चरति रोचनास्य प्राणादपानती। व्यख्यन्महिषो दिवम्॥

२३७२ ओ३म् आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरं च प्रयन्त्स्वः॥

२३७३ ओ३म् उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम् ॥

२३७४ ओ३म् उद्द्यामेषि रजः पृथ्वहा मिमानो अक्तुभिः। पश्यञ्जन्मानि सूर्य॥

२३७५ ओ३म् चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः । चक्षुर्धाता दधातु नः ॥

२३७६ ओ३म् तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमा भासि रोचन ॥

२३७७ ओ३म् त्रिꣳ शद्धाम वि राजति वाक्पतङ्गाय धीयते। प्रति वस्तोरह द्युभिः॥

२३७८ ओ३म् तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम्॥

२३७९ ओ३म् प्रत्यङ्देवानां विशः प्रत्यङ्ङुदेषि मानुषीः। प्रत्यङ्विश्वं स्वऽर्दृशे ॥

२३८० ओ३म् प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान्। स्वर्दृशे॥

२३८१ ओ३म् येना पावक चक्षसा भुरण्यन्तं जनाँ अनु। त्वं वरुण पश्यसि ॥

२३८२ ओ३म् येना पावक चक्षसा भुरण्यन्तं जनाअनु। त्वं वरुण पश्यसि॥

२३८३ ओ३म् वि द्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः। पश्यं जन्मानि सूर्य ॥

२३८४ ओ३म् सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षणम् ॥

२३८५ ओ३म् सप्त त्वा हरितो रथे वहन्ति देव सूर्य। शोचिष्केशं विचक्षण॥

108. सोमः 16

२३८६ ओ३म् अर्थिनो यन्ति चेदर्थं गच्छानिद्ददुषो रातिम् । ववृज्युस्तृष्यत: कामम् ॥

२३८७ ओ३म् अस्माकमायुर्वर्धयन्नभिमाती: सहमानः । सोम: सधस्थमासदत् ॥

२३८८ ओ३म् अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥

२३८९ ओ३म् इमं यज्ञमिदं वचो जुजुषाण उपागहि । सोम त्वं नो वृधे भव ॥

२३९० ओ३म् गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥

२३९१ ओ३म् त्वं चित्ती तव दक्षैर्दिव आ पृथिव्या ऋजीषिन् । यावीरघस्य चिद्द्वेषः ॥

२३९२ ओ३म् द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत। नेष्ट्रादृतुभिरिष्यत ॥

२३९३ ओ३म् पवमानः सोऽअद्य नः पवित्रेण विचर्षणिः। यः पोता स पुनातु मा ॥

२३९४ ओ३म् मा नः सोम सं वीविजो मा वि बीभिषथा राजन् । मा नो हार्दि त्विषा वधीः ॥

२३९५ ओ३म् मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥

२३९६ ओ३म् येन सोम साहन्त्यासुरान्रन्धयासि नः। तेना नो अधि वोचत ॥

२३९७ ओ३म् वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः। प्रजावन्तः सचेमहि ॥

२३९८ ओ३म् सुशेवो नो मृळयाकुरदृप्तक्रतुरवातः । भवा नः सोम शं हृदे ॥

२३९९ ओ३म् सोमो अस्मभ्यं द्विपदे चतुष्पदे च पशवे । अनमीवा इषस्करत् ॥

२४०० ओ३म् सोमो जिगाति गातुविद्देवानामेति निष्कृतम् । ऋतस्य योनिमासदम् ॥

२४०१ ओ३म् स्वादिष्ठया मदिष्ठया पवस्व सोम धारया। इन्द्राय पातवे सुतः ॥